३१। शारिका पंचांग

।5।

शारिका पंचांग

नं० १०८३

5549

4+42+3+7+3=59



श्या॰ प॰ १

ॐ श्रीदेव्यै सदा सफलदायिन्यै नमः श्रीभैरव उवाच शृणु देवि प्रवक्ष्यामि पटलं देवदुर्लभं सर्वसिद्धिकरं दिव्यं सर्वैश्वर्यप्रदायकं यादेवदेवीवरदा श्यामिका त्रिपुरेश्वरी त्रैलोक्यजननी दुर्गा विद्या सप्तान्तरापरा सप्त विद्येश्वरी सैव सप्तलोकान्तराश्रया सप्तद्वीपमयी पृथ्वी शून्यरूपा कुलेश्वरी वक्ष्यामि पटलं देवि मंत्रोद्धारप्रकाशवत् यंत्रोद्धारं लयांगाद्यं यथावद्वर्णयामि ते मंत्रोद्धारं महद्गोप्यं सर्वसिद्धिप्रदं कलौ लोकानां हितकामार्थं तत्रादौ शृणु पार्वति तारं परामानटसिंदुरार्णां स्वेशमेतन्मध्यगतं च नाम श्रुते श्मरी पार्वति श्यामिकायास्तयोदशार्णो मन्त्ररत्नं सुगोप्यः इति मंत्रोद्धारः प्रकाशो मंत्रस्यास्य महादेविन विघ्नो नापि दूषणं न विपर्ययभीर्लोके सिद्धसाध्यारिसंशयः पुरश्चर्यापि फलेनापि न कायक्लेशसंग्रहः साक्षात्सिद्धिप्रदो मंत्रः सर्वविघ्नापहारकः ब्रह्मह

त्यासुराणान महापातककंजमलं प्रक्षालयतिमंत्रोयं ममभक्तस्यभक्तएणङ्कते मंत्र
मुत्कीलयेदादौमृतंसंजीवयेत्ततः सिद्धंमंत्रंजपेन्मयोदद्यादंतेचसंपुटं
ततःसिद्धमंत्रःसिद्धोनामाख्योभवतिध्रुवं अस्यमंत्रस्यदेवेशिप्रभावाद्भैरवो
स्म्यहं विष्णुर्नारायणोदेविब्रह्मालोकपितामहः नदेयःपरशिष्यायभक्ति।
हीनायपार्वति अन्यथासिद्धिहानिःस्यादुभयोशिवशापतः मंत्रस्यास्यऋषिः
प्रोक्तोमहादेवोमहेश्वरि त्रिष्टुप्छंदःसमाख्यातंशारिकादेवतास्मृता श्रीम
वीजंरमाशक्तिसिंधुरंकीलकंस्मृतं धर्मार्थकाममोक्षार्थेविनियोगइतीरितः
तारपरारमावीजैःषड्दीर्घोच्चाररूपकैः न्यासंकुर्यात्षडंगानियेनदेवीमयोभ
वेत् ध्यानमस्याःप्रवक्ष्यामिजगच्चैतन्यकारकं येनध्यानेनदेवेशिपरानंदप्रजा
यते वालार्ककोटिद्युतिमिंदुचूडांवरासिचक्राभयवाहुमाद्यां सिंहाधि।

शा.
प.
२

हूफं शिववामदेवलीनां भजेचेतसिधारिकेशी मंत्रोद्धारंप्रवक्ष्यामिसाध
कानांशुभावहं सर्वार्थसाधकंदिव्यंसर्वाशापरिहरकं एवंत्रिकोणवस्वको
णस्फुटतोद्योतनागदलस्फुटमंडले भूपुरंहि शिखिरवीजंभाविचिंतयंत्रमतद्रा।
दितेशिलालयं गणेशाधर्मवरुणा:कुबेरसहित:शिवे पूज्याहवीत्तैतै:ग
धोक्षत्रहीरेणुसाधकै: इंद्राद्याश्चैवदिक्पालास्तथेशानक्रमेणच ब्राह्मीच
वैष्णवीदेवीचंडिकाप्यपराजिता कौमारीशांभवीचैववाराहीनारसिंहिका
पूज्यावामक्रमेणैतामातृचक्रस्यमातरा: तत्रैवगुरवोभ्यर्च्याःस्त्रिसुहृत्तेषुसा
धकै: गुरुंचपरमंदेविपरापरगुरुंतथा परमेष्ठिगुरुंदेविनत्वापूज्यास्य।
भैरवा: संहारोभीषणोदेविकपालोन्मत्तभैरवो क्रोधश्चांडोरुरुश्चैवमसि
तांगोमहेश्वरि इत्येतान्भैरवान्देविवक्ष्यपत्रेषुपूजयेत् ब्राह्माद्यामातरोयत्र

तत्रं संपूजयेत्सदा भैरवान्दक्षिणाहृन्यामात्रचक्रंचवामतः आमाकामाचचार्वी
गीदेवीचटंकधारिणी ताराचपार्वतीदेवि संपूज्यारुक्मिणीशिवा वामावर्तक्रमे
णेवचवसुकोणगतः शिवे कालिकात्रिपुरादुर्गापूज्यामध्यत्रिकोणगाः ईशानक्र
मयोगेनयथाभीष्टफलप्रदः मध्येश्रीशारिकादेवीवामदेवांकमध्यगा मकारैः
पंचभिःकौलःकुलाचारपरायणः संपूजयेन्महादेवि साधकोमंत्रसाधकः व
रचक्रंचखड्गंचपूजयेदभयंतथा विंदौगंधाक्षतैःपुष्पैर्धूपदीपादितर्पणैः
नैवेद्याचमनीयाद्यैस्ताम्बूलैश्चसुवासितैः लयांगमिदमाख्यातंप्रयोगंशृणु
पार्वति स्तंभनंमोहनंचैवमारणाकर्षणेतथा वशीकारंतथोच्चाटंपंशांतिकंपौ
ष्टिकंपरं एतेषांसाधनंवक्ष्येरहस्यंपरमाद्भुतं येनसाधनमात्रेणसाधकोभैरवो
भवेत् रवौस्नात्वाशिवरूपेकृत्वाकर्माह्निकंतदा अर्धरात्रेनिराहारोजपेन्मूलं

शा. चतुर्थ्यथे अयुतंनियमेनैवदशांशंहोममाचरेत् घृतराज्ञाशाठीतैलकक
प. लासादिभिः शिवे ब्रह्माहरिशिवोजिष्णुस्तंभवान्भवतिध्रुवं चंद्रेमध्याह्नवेला
२ यांवीतसीमूलमंडले त्रिकोणंमंडलंकृत्वाष्टौचक्रंसजयेत्ततः अयुतंप्रजपेन्मू
लंनियमेनमहेश्वरि हूयेदाज्यपयोमत्स्यकर्दमसवतज्जटाः शीतोष्टतेनदेवे
शिभस्मनातिलकंचरेत् तस्यदर्शनमात्रेणत्रैलोक्यंमोहमेष्यति भौमेनिशामुखे
गत्वाश्मशानमयुतंजपेत् चितायांतत्रदीप्ताग्नौहूयेदाज्यंसगोमयं शमीमूलं
नवाष्टौनिशत्रून्मृत्युमुखंव्रजेत् बुधेगत्वावनेदेविवटाश्वत्थतलेजपेत् अयु
तंमूलमेकाकीहूयोतस्योयस्यंमितं मांसमासवरंचचफलाणिचमहेश्वरि मी
नकापीनवत्रोजाप्रातःप्रादुर्भविष्यति गुरौगत्वाश्रावामीनोजपेन्मूलंचतुर्थ्यथे
अयुतंवाशुनार्थवाहूयेत्मायसमासवं स्वयंचासकलोलात्तःसाध्यतोबलमिश्रि

3

तं इंद्राग्नियमवरुणानिलनिर्ऋतिवित्तदाः सेश्वराः सह्मातस्यवशमेष्यन्तिसं
शयं शुक्रेर्धरात्रे विष्ण्यांवागत्वाप्रेतालयंपरं एकाकीप्रजपेत्तत्रकृत्वापानं।
जनंशिवे अयुतंतुचितावह्नौहूयेदास्यंसकंबुकं चितांगारस्थयेदेवि रिपोरु
च्चाटनंभवेत् शनौमध्याह्नसमयेस्नात्वाकृत्वाह्निकींक्रियां गत्वादेवालयंदेविदे
वींध्यात्वायथाविधि तदग्रेप्रजपेद्धीमंत्रंजपेन्मूलमथायुतं तत्रत्रिकोणकुंडेतुहू
येदास्यंसभैरवं रुरुमांसंकुलेशानिकुक्कुटस्यशिरस्तथा सद्यःसर्वसयानांच
शांतिर्भवतिपार्वति अष्टम्यांचचतुर्दश्यांगत्वाप्रेतालयंशिवे जपेदयुतमर्धंवा
हूयेत्पायसंशर्करां मद्वीकांक्षीरमध्वादीन्महापुष्टिप्रजायते इत्येषविधिरा
ख्यातः सर्वतंत्रेषुगोपितः नाख्येयोनचदृष्टव्योयोगिनीचक्रपूजकैः इत्ययं
पटलोगुह्यःसकलागमसारवान् रहस्यभूतोमेदेविगोपनीयोमुमुक्षुभिः

शा. प. ४

इतिश्रीरुद्रयामलेतंत्रेदशविद्यारहस्येश्रीशारिकाभगवतीपटलंसमाप्तं

श्रा॰ ओं श्रीदेव्यैसिद्धिदायैनमः अथनापद्धतिंवक्ष्येश्रीशिलार्चनसंयुतां गद्य
प॰ पद्यमयींगोप्यांसकलागमनिश्चितां प्रातःकृत्यमकृत्वातुयोदेवींभक्तितोर्च
१ येत् तस्यपूजातुविफलाशौचहीनायथाक्रिया तत्रश्रीमान्साधकोब्राह्मेमु
हूर्ते शयनतलादुत्थाय करचरणादिप्रक्षाल्याचम्य निजासनेसमुपविश्य
निजशिरसि श्वेतवर्णाधोमुखसहस्रदलकमलकर्णिकांतर्गत चंद्रमंड
लसिंहासनोपरि निषण्णं स्वगुरुंशुक्लवर्णंशुक्लालंकारभूषितं ज्ञानानंद
मुदितमानसं सच्चिदानंदविग्रहं त्रिनयनंचतुर्भुजं ज्ञानमुद्रापुस्तकवरा
भयकरं वामांगेवामहस्तधृतकमलया रक्तवसनाभरणया स्वशक्त्यादक्षभु
जेनालिंगितं सर्वदेवादिदेवं सर्वतीर्थतीर्थं परमशिवस्वरूपं शांतंस्वप्रस
न्नंध्यात्वा तच्चरणकमलयुगलविगलदमृतधारयास्वात्मानंप्लुतंविभाव्य

मानसोपचारैराराधयेद्यथा लं पृथिव्यात्मकं गंधं समर्पयामि नमः हं आकाशा
त्मकं पुष्पं समर्पयामि नमः यं वाय्वात्मकं धूपं समर्पयामि नमः रं वह्न्यात्मकं दीपं
समर्पयामि नमः वं अमृतात्मकं नानानैवेद्यं समर्पयामि नमः सं सर्वात्मकं फल।
मूलतांबूलादिकं समर्पयामि नमः ॐ ऐं ह्रीं श्रीं हसखफ्रें हसक्षमलवरयूं सहख
फ्रें सहक्षमलवरयीं स्हौः स्हौः श्रीमच्छ्रीस्वामि परतापकौलानंदनाथ श्रीपादु
कां श्रीदयावमंवा श्रीपादुकां पूजयामि नमः इति दशधा विमृश्य मनसा दंडवत्प्रण
मं कुर्यात् सहस्रदलपंकजे सकलशीतरश्मिप्रभं वराभयकराम्बुजं विमलगं
धपुष्पांबरं प्रसन्नवदनेक्षणं सकलदेवतारूपिणं स्मरेच्छिरसि हंसगं तदभिधा
नपूर्वं गुरुं इति ध्यात्वा प्रणाममंत्रान् पठेत् नमामि सद्गुरुं शांतं प्रत्यक्षं शिव।
रूपिणं शिरसा योगपीठस्थं मुक्तिकामार्थसिद्धये १ श्रीगुरुं परमानंदं वंदाम्या

गु०
टी०
२

नंदविग्रहं यस्यसान्निध्यमात्रेणचिदानंदायतेपरं २ अखंडमंडलाकारंव्याप्तंयेन
चराचरं तत्पदंदर्शितंयेनतस्मैश्रीगुरवेनमः ३ प्रकाशानंदनाथंचविमर्शानं
दनाथकं आनंदानंदनाथंचवदिओाद्येगुरुमंडले ४ श्रीज्ञानानंदनाथंचश्रीसत्या
नंदनाथकं श्रीपूर्णानंदनाथंचसिद्धौघान्प्रणमाम्यहं ५ स्वभावानंदनाथंचप्रति
भानंदनाथकं सुभगानंदनाथंचमानवौघान्गुरून्भजे ६ अज्ञानतिमिरांधस्य
ज्ञानांजनशलाकया चक्षुरुन्मीलितंयेनतस्मैश्रीगुरवेनमः ७ गुरुर्ब्रह्मागुरु
र्विष्णुर्गुरुःसाक्षान्महेश्वरः गुरुरेवजगत्सर्वंतस्मैश्रीगुरवेनमः ८ नमस्तेना
थभगवन्शिवायगुरुरूपिणे विद्यावतारसंसिद्धैस्वीकृतानेकविग्रह ९ नवा
यनवरूपायपरमार्थैकरूपिणे सर्वाज्ञानतमोभेदभानवेचिद्घनायते १० स्वतंत्रा
यदयाक्लृप्तविग्रहायपरात्मने परतंत्रायभक्तानांभव्यानांभव्यरूपिणे ११ वि

वेकिनांविवेकायविमर्शायविमर्शिनां प्रकाशिनांप्रकाशायज्ञानिनांज्ञानरूपि
णे १२ परस्तात्पार्श्वयोः पृष्ठे नमस्कुर्यामुपर्यधः सदासच्चित्तरूपेणविधेहिभवदास
नं १३ इतिश्रीगुरुंप्रणम्य स्वप्रसन्नं विभाव्य मनसातदाज्ञांगृहीत्वा मूलाधारेस्वर्णा।
वर्णचतुर्दलकमलकर्णिकांतर्गतपृष्ठेगांटकांतवर्तित्रिकोणपीठोपरि परांशक्तिं
कुंडलिनीं सर्पाकारांमूर्धमुखींसार्धत्रिवलयां उद्यद्दिनकरसहस्रभास्वरां विद्यु
त्कोटिसन्निभां विसतंतुतनीयसीं पंचाशद्वर्णविग्रहां अष्टात्रिंशत्कलारूपिणीं
त्रियामथामानं सर्वप्राणिजीवां सर्वदेवाधिदेवीं सकलमंत्रमातरंस्मृत्वाविभाव्य
श्रीगुरूपदिष्टनिजसहजनादेन सचैतन्यांविधाय तत्रचतुर्ष्वदलेषु वंनमः शंनमः
षंनमः संनमः इतिपत्रेषुमध्येमूलेनचसंपूज्य प्रादक्षिण्येनसंपूज्य पूर्वोक्तमंत्रेण
कमलात्कमलेनीत्वा ततःस्वाधिष्ठानेलिंगमूले विद्रुमवर्णषट्दलकमलेतांप्रा

षा. प्य तत्र वं नमः भं नमः मं नमः यं नमः रं नमः लं नमः इति पत्रेषु मध्ये मूलेन च संपू
सू. ज्य ततो मणिपूरके नाभौ नीलवर्णे दशदलकमले तां नीत्वा तत्र डं नमः ढं नमः णं न
२ मः तं नमः थं नमः दं नमः यं नमः नं नमः पं नमः फं नमः इति पत्रेषु मध्ये मूलेन च सं
पूज्य ततोऽनाहते वक्षसि कपिलवर्णे द्वादशदलकमले तां नीत्वा तत्र कं नमः खं नमः
गं नमः घं नमः ङं नमः चं नमः छं नमः जं नमः झं नमः ञं नमः टं नमः ठं नमः इति पत्रेषु
मध्ये मूलेन च संपूज्य ततो विशुद्धौ कंठे धूम्रवर्णे षोडशदलकमले तां नीत्वा तत्र अं नमः
आं नमः इं नमः ईं नमः उं नमः ऊं नमः ऋं नमः ॠं नमः लृं नमः ॡं नमः एं नमः ऐं नमः
ओं नमः औं नमः अं नमः अः नमः इति पत्रेषु मध्ये मूलेन च संपूज्य ततो भ्रूमध्ये आज्ञाच
क्रे विद्युद्वर्णे द्विदलकमले तां नीत्वा तत्र हं नमः क्षं नमः इति पत्रयोर्मध्ये मूलेन च संपूज्य
ततो ब्रह्मरंध्रगतसहस्रदलकमले तां प्रापय्य तत्र बिंदुरूपतेजोमयपरमशिवेन सह

कृतां नीत्वा ततः स्रवत्परमामृतेन तां संतर्प्य तत्र नादश्रवणतन्मयो भूत्वा हूं ते लयं
विभाव्य ततोऽवरोहे सर्वत्र सोऽहमिति मंत्रेण कमलात्कमलेऽवरोह्यमाणा मा
त्राचक्रादिक्रमेण तेषु तेषु कमलेषु तैस्तैस्तत्त्वैः संपूज्यमाना तत्तदाधारतत्त्वा
तत्तत्त्वानि तत्तदधिदेवताः संतर्पयंती मूलाधारं प्रापय्य तत्रैव स्वस्थाने संस्था।
पयेत् इत्यारोहावरोहणक्रमेण परां शक्तिं कुंडलिनीं ध्यात्वा प्रकाशमानां प्रथमे
प्रयाणे प्रतिप्रयाणेऽप्यमृतायमानां अंतःपदव्यामनुसंचरंती मानंदरूपामव।
लोक्य प्रपद्ये इति स्मृत्वा नाहमस्मि न चान्योऽस्ति ध्येयं चात्र न विद्यते आनंदपदसंली
नं मनः समरसीगतं ततस्तत्तेजसाप्यायितं स्वदेहं विचिंत्य तत्तेजसैव परिणतां श्री
परदेवतां ध्यात्वा मानसोपचारैः संपूज्य प्राणायामत्रयं कृत्वा तद्विधिर्यथा अथ
विहितपद्मासनो मूलाधारार्पितचित्तवृत्तिर्मूलं प्रणवं वा षोडशवारमुच्चरन्

गा
पू.
४

दक्षांगुष्ठेनदक्षनासापुटंनिरुध्य वामेनपवनंपूरयेत् ततस्तमेवचतुष्षष्टिवार
मुच्चरन् दक्षनासाकनिष्ठाभ्यांवामपुटंचनिरुध्य द्वाभ्यांपवनंकुंभयेत् ततस्तमे
वद्वात्रिंशद्वारमुच्चरन् दक्षेणशनैःपवनंरेचयेत् इडयापिबषोडशभिःपवनंकुरु
षष्टिचतुष्टयमंतरगंत्यजपिंगलयाशनकैःशनकैर्दशभिर्दशभिर्दशभिर्द्वाभ्यां
कैः इत्येकःप्राणायामः एषएवविपर्ययेणक्रियमाणोद्वितीयः प्रथमवत्तृ
तीयः इत्थंप्राणायामत्रयेण निरस्तसकलकल्मषस्वदेहं देवताराधनयोग्यं
विभाव्य अथमहागणपतिजपविधिः अस्यश्रीमहागणपतिमंत्रस्य श्री
ब्रह्माऋषिः गायत्रंछंदः श्रीमहागणपतिर्देवता गंबीजं ह्रींशक्तिः नमःकी
लकं श्रीशारिकावामदेवांगत्वेनजपेविनियोगः इतिकृतांजलिःस्मृत्वान्यसेत्
ब्रह्मऋषयेनमःशिरसि गायत्रंछंदसेनमोमुखे श्रीमहागणपतिर्देवतायेनमः

हृदि गंबीजायनमः गुह्ये ह्रींशक्तयेनमः पादयोः ऊंरुंऊंरुंकीलकायनमः ना
भौ श्रीशारिकावामदेवांगत्वेनजपेविनियोगः सर्वांगेषु इतिऋष्यादिन्यासः अथ
करन्यासः गांअंगुष्ठाभ्यांनमः गींतर्जनीभ्यांस्वाहा गूंमध्यमाभ्यांवषट् गैंअना
मिकाभ्यांहुं गौंकनिष्ठिकाभ्यांवौषट् गः करतलकरपृष्ठाभ्यांफट् इतिकरन्या
सः अथषडंगन्यासः गांहृदयायनमः गींशिरसेस्वाहा गूंशिखायैवषट् गैं
कवचायहुं गौंनेत्रत्रयायवौषट् गः अस्त्रायफट् अथध्याने ऊंगजवदन
मचिंत्यंतीक्ष्णदंष्ट्रंत्रिनेत्रंबृहदुदरमनंतंदंतमालेदधंते परशुचषकपद्म
हेदहस्तारविंदं हरियुगलनिविष्टंश्रीगणेशंभजामि इतिध्याने अथगायत्री
गंतत्पुरुषायविद्महे वक्रतुंडायधीमहि तन्नोदंतिः प्रचोदयात् १ अथमंत्रः
ऊंश्रींह्रींक्लींग्लौंगंगणपतयेवरवरदसर्वजनमेवशमानयस्वाहा १०८

शा. जपांतेमालांशिरसिसंस्थाप्य पूर्ववत्षडंगकरऋष्यादिन्यासध्यानांतंकृत्वा
ष्ट. मालांरहःसंस्थाप्य गुह्यातिगुह्यगोप्तात्वंगृहाणास्मत्कृतंजपं सिद्धिर्भवतुमेदे
५ वत्वत्प्रसादाद्दिनायक अनेनमंत्रजपेनमहागणेशःप्रीयतांप्रीतोस्तु ॥
अथवामदेवजपविधिः अस्यश्रीवामदेवभैरवमंत्रस्य श्रीकालाग्निरुद्रऋ
षिः त्रिष्टुप्छंदः श्रीशारिकेश्वरोवामदेवोदेवता ह्रांबीजं वांशक्तिः ॐकीलकं
श्रीशारिकायाइष्टांगत्वेनजपेविनियोगः इतिकृतांजलिःस्मृत्वान्यसेत् श्रीका
लाग्निरुद्रऋषयेनमःशिरसि त्रिष्टुप्छंदसेनमोमुखे श्रीशारिकेश्वरोवामदेवो
देवतायैनमोहृदि ह्रांबीजायनमःगुह्ये वांशक्तयेनमःपादयोः ॐकील
कायनमःनाभौ श्रीशारिकायाइष्टांगत्वेनजपेविनियोगः सर्वांगेषु इतिऋष्या
दिन्यासः अथकरन्यासः वांअंगुष्ठाभ्यांनमः वींतर्जनीभ्यांस्वाहा वूंमध्यमा

भ्यांवषट् वैं अनामिकाभ्यां ऊं वौं कनिष्ठिकाभ्यां वौषट् वः करतलकरपृष्ठा
भ्यांफट् इतिकरन्यासः अथषडंगन्यासः वां हृदयायनमः वीं शिरसे स्वाहा हूं
शिखायैवषट् वैं कवचाय हुं वौं नेत्रत्रयाय वौषट् वः अस्त्राय फट् इतिषडंगन्यासः
अथध्याने स्वर्णेंदुकोटिप्रभमिंदुहस्तं कपालखट्वांगगदासिहस्तं भस्मास्थिमा
लांचितगात्रमाद्यं श्रीवामदेवं शिवमाश्रयामि इतिध्याने अथगायत्री वां वामदे
वायविद्महे शाश्वतीनाय धीमहि तन्नोवामदेवः प्रचोदयात् इतिगायत्री अथमंत्रः
ॐ ह्रां वां वामदेवायनमः १०८ मूलमंत्रं यथाशक्तिजपित्वा जपांतेमालांशिरसिसं
स्थाप्य एवंवत्षडंगकरऋष्यादिन्यासध्यानांतेकृत्वा मालां रहः संस्थाप्य गुह्यातिगु
ह्यगोप्तात्वंगृहाणास्मत्कृतंजपं सिद्धिर्भवतुमेदेवत्वत्प्रसादान्महेश्वर अनेनमंत्रज
पेन श्रीवामदेवप्रीयतां प्रीतोस्तु ॥ स्वमूलमंत्रस्य ऋष्यादिस्मरणंविदधीत यथा

शा. अस्यश्रीशारिकाभगवतीमंत्रराजस्य श्रीमहादेवऋषिः त्रिष्टुप्छंदः श्रीशा
पू. भगवतीदेवता श्रांबीजं श्रींशक्तिः फ्रांकीलकं धर्मार्थकाममोक्षार्थे जपे वि।
६ नियोगः इतिकृतांजलिःस्मृत्वान्यसेत् श्रीमहादेवऋषयेनमःशिरसि त्रिष्टुप्छंद
6 सेनमोमुखे श्रीशारिकाभगवतीदेवतायैनमोहृदि श्रांबीजायनमोगुह्ये श्रीं
शक्तयेनमःपादयोः फ्रांकीलकायनमोनाभौ धर्मार्थकाममोक्षार्थे जपेविनि
योगःसर्वांगेषु इतिऋष्यादिन्यासः अथकरन्यासः ॐह्रांश्रांअंगुष्ठाभ्यांनमः
ॐह्रींश्रींतर्जनीभ्यांस्वाहा ॐह्रूंश्रूंमध्यमाभ्यांवषट् ॐह्रैंश्रैंअनामिकाभ्यांहुं ॐह्रौं
श्रौंकनिष्ठिकाभ्यांवौषट् ॐह्रःश्रःकरतलकरपृष्ठाभ्यांफट् इतिकरन्यासः अथषडं
गन्यासः ॐह्रांश्रांहृदयायनमः ॐह्रींश्रींशिरसेस्वाहा ॐह्रूंश्रूंशिखायैवषट् ॐह्रैंश्रैं
कवचायहुं ॐह्रौंश्रौंनेत्रत्रयायवौषट् ॐह्रःश्रःअस्त्रायफट् अथध्यानं ॐबाला

कंकोटिद्युतिमिंडहस्तं वरासिचक्राभयवाङ्गमाद्यां सिंहाधिरूढां शिववाम
देवलीनां भजे चेतसि शारिकेशीं इति ध्यानं अथ गायत्री ॐ शारिकादेव्यै वि
द्महे सप्तबीजात्मिकायै धीमहि तन्नः शारी प्रचोदयात् १ इति गायत्री अथ मंत्रः
ॐ ह्रीं श्रीं ह्रूं फ्रां स्रां शां शारिकायै नमः १८ इति स्वहृदयकमले श्रीपरदेवतां
स्वाभेदेन ध्यात्वा मानसैरुपचारैः संपूज्य वक्ष्यमाणेन कीलनादिमंत्रात् श्रीभैरव
मंत्रं च जप्त्वा मालामादाय ॐ मां माले महामाये सर्वशक्तिस्वरूपिणि चतुर्वर्गस्त्व
यि न्यस्तस्तस्मान्मे सिद्धिदा भव ॐ सिद्ध्यै नमः इति मनसा गंधादिना तामपि संपूज्य
गं अविघ्नं कुरु माले त्वं इति दक्षकरेण गृहीत्वा शिरसि गुरुं श्वेतवर्णं कंठे पीतव
र्णां मूलविद्यां हृदि यथोक्तरूपां श्रीदेवीं ध्यायन् यथाशक्ति जपं विधाय जपांते
त्वं माले सर्वदेवानां प्रीतिदा शुभदा भव शुभं कुरुष्व मे भद्रे यशो वीर्यं च सर्वदा इति

प्रा. पू. ८

ष्टदं ततः पठित्वा मालां शिरसि संस्थाप्य पुनरपि पूर्ववत्प्राणायामत्रयं ऋष्यादिकर
षडंगन्यासान्विधाय गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपं सिद्धिर्भवतु मे दे
वि त्वत्प्रसादान्महेश्वरि इत्यनेन तेजोमयं जपफलं श्रीदेवीवामहस्ते समर्प्य यो
निमुद्रया प्रणमेत् प्रातः प्रभृति सायान्तं सायादि प्रातरंततः यत्करोमि जगद्यो
ने तदस्तु तव पूजनं इति निजकृत्यं समर्प्य स्वाकार्यानुष्ठानाय ॐ त्रैलोक्यचैत।
न्यमये स्वरेशि श्रीपुरारिके त्वच्चरणाज्ञयैव प्रातः समुत्थाय तव प्रियार्थं संसार
यात्रामनुवर्तयिष्ये संसारयात्रामनुवर्तमानं श्रीपुरारिके त्वच्चरणानुयाले स्प
र्धातिरस्कारकलिप्रमादभयानि मामभिभवंतु मातः जानामि धर्मं न च मे।
प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः त्वया हृषीकेश हृदिस्थया हं यथा नि।
युक्तोस्मि तथा करोमि इति श्रीदेव्याज्ञां संप्राप्य मूलाधारादिद्वादशांतच।

क्रपर्यंतस्थितनाभ्यो गणपतिप्रभृतिदेवताभ्यो गुरूपदेशज्ञातं सहजसिद्धमज
पाजपं समर्पयेद्यथा ॐ अद्य पूर्वेद्युरहोरात्राचरितस्वच्छासनिःश्वासात्मकं ष
ट्शताधिकमेकविंशतिसहस्रसंख्याकमजपाजपं मूलाधारस्वाधिष्ठानमा
णिपूरानाहतविशुद्धाज्ञाब्रह्मरंध्रेषु चतुर्दल षट्दल दशदल द्वादशदल षोड
शदलद्विदलसहस्रदलेषु स्वर्णविद्रुमनीलपिंगलधूम्रविद्युत्कर्बुरवर्णेषु
स्थिताभ्यो गणपतिब्रह्मविष्णुरुद्रजीवात्मपरमात्माश्रीगुरुपादुकाभ्यो यथाभा
गशः समर्पयामि इति कृतांजलिः संकल्प्य समर्पयेत् ॐ ऐं ह्रीं श्रीं मूलाधारचक्र
स्थाय गणपतये ऽजपाजपानां षट्शतानि समर्पयामि नमः ६०० ॐ ऐं ह्रीं श्रीं स्वा
धिष्ठानचक्रस्थाय ब्रह्मणे ऽजपाजपानां षट्सहस्राणि समर्पयामि नमः ६००० ॐ
ऐं ह्रीं श्रीं मणिपूरकचक्रस्थाय विष्णवे ऽजपाजपानां षट्सहस्राणि समर्पयामि नमः ६०००

प्रा॰ ॐ ऐं ह्रीं श्रीं अनाहतचक्रस्थाय रुद्राय अजपाजपानां षट्सहस्राणि समर्पयामि न
पु॰ मः ६ ॐ ऐं ह्रीं श्रीं विशुद्धचक्रस्थाय जीवात्मने अजपाजपानां सहस्रं समर्पयामि न
८ मः ७ ॐ ऐं ह्रीं श्रीं आज्ञाचक्रस्थाय परमात्मने अजपाजपानां सहस्रं समर्पयामि नमः ।७
ॐ ऐं ह्रीं श्रीं सहस्रदलकमलकर्णिकामध्यवर्तिन्यै श्रीगुरुपादुकायै अजपाजपानां
सहस्रं समर्पयामि नमः इत्यजपाजपं समर्प्य ॐ अद्य सूर्योदयमारभ्य आगामिसू
र्योदयं यावत् अहोरात्रेणोच्छ्वासनिःश्वासात्मकं षट्शताधिकमेकविंशतिसह
स्रसंख्याकमजपाजपमहं करिष्ये इति कृताञ्जलिः संकल्प्य अजपामंत्रेण प्राणा
यामं विधाय अस्य श्री अजपागायत्रीमंत्रस्य हंस ऋषिः अव्यक्तगायत्री छंदः पर
मात्मा देवता हं बीजं सः शक्तिः सोहं कीलकं ॐकारस्तत्त्वं नभः स्थाने हैमो वर्णः
उदात्तः स्वरः मम मोक्षार्थे जपे विनियोगः इति कृताञ्जलिः स्तुत्वा न्यसेत् ॥

ॐ ऐं ह्रीं श्रीं हंसऋषये नमः शिरसि ॐ ऐं ह्रीं श्रीं अव्यक्तगायत्रीछंदसे नमो मुखे
ॐ ऐं ह्रीं श्रीं परमात्मदेवतायै नमः हृदि ॐ ऐं ह्रीं श्रीं हं बीजाय नमः गुह्ये ॐ ऐं ह्रीं
श्रीं सः शक्तये नमः पादयोः ॐ ऐं ह्रीं श्रीं सोहं कीलकाय नमः नाभौ ॐ ऐं ह्रीं श्रीं
ॐकारतत्त्वाय नमः हृदये नमस्तेस्थानाय नमः मूर्ध्नि हेमाय वर्णाय नमः कंठे
इति विन्यस्य मम मोक्षार्थे जपे विनियोगः सर्वांगेषु इति ऋष्यादिन्यासः अथ क
रन्यासः ॐ ऐं ह्रीं श्रीं ह्रां सूर्यात्मने स्वाहा अंगुष्ठाभ्यां नमः ॐ ऐं ह्रीं श्रीं ह्रीं सोमा
त्मने स्वाहा तर्जनीभ्यां स्वाहा ॐ ऐं ह्रीं श्रीं ह्रूं निरंजनात्मने स्वाहा मध्यमाभ्यां वष
ट् ॐ ऐं ह्रीं श्रीं ह्रैं निराभासात्मने स्वाहा अनामिकाभ्यां हुं ॐ ऐं ह्रीं श्रीं ह्रौं अनंततनु
सूक्ष्मा देवी प्रचोदयात् स्वाहा कनिष्ठिकाभ्यां वौषट् ॐ ऐं ह्रीं श्रीं ह्रः अव्यक्तबोधा
त्मने स्वाहा करतलकरपृष्ठाभ्यां फट् इति करन्यासः अथ षडंगन्यासः ॐ ऐं

ह्रीं श्रीं ह्लां सूर्यात्मने स्वाहा हृदयाय नमः ॐ पें ह्रीं श्रीं ह्लीं सोमात्मने स्वाहा शिरसे स्वा
हा ॐ पें ह्रीं श्रीं ह्लूं निरंजनात्मने स्वाहा शिखायै वषट् ॐ पें ह्रीं श्रीं ह्लैं निराभासात्मने स्वा
हा कवचाय हुं ॐ पें ह्रीं श्रीं ह्लौं अनंततनुः सूक्ष्मा देवी प्रचोदयात् स्वाहा नेत्रत्रयाय वौष
ट् ॐ पें ह्रीं श्रीं ह्लः अव्यक्तबोधात्मने स्वाहा अस्त्राय फट् इति षडंगन्यासः अथ ध्यानं
द्यौर्मूर्धानं यस्य विप्रा वदंति खं वै नाभिं चंद्रसूर्यौ च नेत्रे दिग्भिः श्रोत्रं यस्य पादौ
क्षितिश्च ध्यातव्योसौ सर्वभूतांतरात्मा इति विराट्स्वरूपस्वात्मानं ध्यात्वा तदनुस
पायी प्राणवायोर्निर्गमप्रवेशात्मकं अजपामंत्रं पंचविंशतिवारं जप्त्वा समर्प्य
श्रीगुरूपदिष्टमार्गेणानादानुसंधानपूर्वकं निरस्तसमस्तोपाधिना केनापि।
चिद्विलासेन प्रवर्तमानोस्मीति विभाव्य स्वकार्यानुष्ठानाय समुद्रमेखले देवि
पर्वतस्तनमंडले विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे इति भूमिं प्रार्थ्य

श्वासानुसारेण तस्यां पादं निधाय नेदं तत्साधकः सर्वे विनश्यन्तु विदूषकाः
अवस्थां शांभवीमेत्य प्रसन्नोस्तु गुरुः सदा इत्यादि वदन्बहिर्गत्वा मलमूत्रो
त्सर्गशौचाचमनं विधाय क्लीं कामदेवाय सर्वजनप्रियाय नमः इति दन्तधा
वनं कुर्यात् ततो नद्यादौ गत्वा वैदिकस्नानं निर्वर्त्य तान्त्रिकमारभेद्यथा तत्रादौ
मूलेन करचरणमुखानि प्रक्षाल्य ॐ मणिधरि वज्रिणि महाप्रतिसरे रक्ष रक्ष
हुं फट् स्वाहा इति शिखां बद्ध्वा आचमनत्रयं कुर्यात् मूलं आत्मतत्त्वं शोध
यामि स्वाहा मूलं विद्यातत्त्वं शोधयामि स्वाहा मूलं शिवतत्त्वं शोधयामि स्वाहा
इत्याचम्य मलापकर्षणस्नानं विधाय पुनराचम्य नाभिमात्रे जले स्थित्वा ॐ अ
द्यामुकमासे इत्यादि श्री अमुकदेवी प्रीत्यर्थं तान्त्रिकस्नानमहं करिष्ये इति सं
कल्प्य प्राणायामं कृत्वा स्वमूलऋष्यादिकरषडङ्गन्यासं कृत्वा स्वपुरतो ज

ग्रा॰ पू॰ १० 10

लेहस्तमात्रं चतुरस्रं तीर्थं परिकल्प्य ॐ ब्रह्मांडोदरतीर्थानि करैः स्पृष्टानि
ते रवे तेन सत्येन देवेश तीर्थं देहि दिवाकर इति सूर्यं तीर्थं प्रार्थ्य क्रोंइत्य
कुशमुद्रया सूर्यमंडलं भित्वा गंगे च यमुने चैव गोदावरि सरस्वति नर्मदे सिं
धुकावेरि जलेऽस्मिन्सन्निधिं कुरु इति सूर्यमंडलात्तीर्थमावाह्य पुरः कल्पित
तीर्थे संयोज्य पुनः सूर्यमंडलादेव क्रोंह्रींह्रूंह्रैंह्रौंह्रः सर्वानंदमये तीर्थशक्ते
एह्येहि स्वाहा इति तीर्थशक्तिमावाह्य तस्मिंस्तीर्थमंडले तां ध्यायेद्यथा
सर्वानंदमयीमशेषदुरितध्वंसां मृगांकप्रभां अंकाभ्यां चोर्ध्वकरद्वयेन दधतीं पा
शांसृणिं चक्रमात् दोर्भ्यां चामृतपूर्णहेमकलशं स्रक्चाक्षमालां वरां गंगासिं
धुसरिद्वयादिसहितां श्री तीर्थशक्तिं भजे इति ध्यात्वा ॐ नमो भगवति अंबे
अंबालिके अंबिके महामालिनि एह्येहि भगवति अशेषतीर्थालवाले ह्रीं शि

वज्रदाधिहूंफेंगंगेगेंगांविकेस्वाहा इतिमंत्रेणसप्तधाभिमंत्र्य ह्रीं इत्यालो
ड्य वमित्यमृतेशमुद्रयाऽमृतीकृत्य ॐ आत्मतत्त्वायनमः विद्यातत्त्वायनमः
शिवतत्त्वायनमः इतितत्त्वत्रयंजलेविन्यस्य तत्रश्रीचक्रंविभाव्य तत्रस्वहृदयक
मलाद्देवीमावाह्य षडंगेनसकलीकृत्य ॐ भमुद्रयातांसावरणांस्नपयित्वा यो
निमुद्रयामूलेनतज्जलमष्टधाऽभिमंत्र्य तत्रमूलमंत्रस्मरणपूर्वकंत्रिर्नि मा
ज्योन्मज्जेत् ततःॐभमुद्रयामूलमंत्रंपठन् स्वशिरसित्रिरभिषिच्य मूलेन
देवींत्रिःसंतर्प्य भूयोदेवींस्वहृदिसमानीय मूलंआत्मतत्त्वंशोधयामिस्वाहा
मूलंविद्यातत्त्वंशोधयामिस्वाहा मूलंशिवतत्त्वंशोधयामिस्वाहा इतित्रिराचम्य
तीरमारुह्य धौतेवाससीपरिधाय त्रिपुंड्रकमूर्ध्वपुंड्रकंवातिलकंविधाय
इतिस्नानविधिः अथसंध्याविधिः तत्रपूर्ववदाचम्य मूलेनत्रिःखंडंवस्त्रा

प्रा॰
प्र॰
११

प्राणायामऋष्यादिकरषडंगन्यासान्विधाय स्वगुरनोतथैवरचितंतीर्थंजल
मम्रुतमुद्रयाम्रुतीकृत्य मूलेनाष्टधाऽभिमंत्र्य तेनजलेन अंनमः आंनमः इं
नमः ईंनमः उंनमः ऊंनमः ऋंनमः ॠंनमः ऌंनमः ॡंनमः एंनमः ऐंनमः ओंन
मः औंनमः अंनमः अःनमः कंनमः खंनमः गंनमः घंनमः ङंनमः चंनमः छंनमः
जंनमः झंनमः ञंनमः टंनमः ठंनमः डंनमः ढंनमः णंनमः तंनमः थंनमः दंनमः
धंनमः नंनमः पंनमः फंनमः बंनमः भंनमः मंनमः यंनमः रंनमः लंनमः वंनमः
शंनमः षंनमः संनमः हंनमः ळंनमः क्षंनमः इत्यंतर्मातृकाक्षरैः स्वशिरःप्रोक्ष्य
मूलेनचत्रिःसंप्रोक्ष्य दक्षहस्तेजलमादाय वामेनाच्छाद्य लंवंरंयंहं इतिपांच
भौतिकमंत्रैःसप्तवारमभिमंत्र्य मूलेनत्रिरभिमंत्र्य मूलमुच्चरवामहस्तकं।
त तत्त्वमुद्रयामूर्ध्निंत्रियाभ्युक्ष्य अवशिष्टंजलंवामहस्तेनिधाय तजोरूपं।

तज्जलमिडयाकृष्य स्वदेहांतःस्थितं सकलकल्मषं प्रक्षाल्य तज्जलं कृष्ण।
वर्णं पिंगलयाबहिर्निर्गतं मत्वा पुनः दक्षहस्ते कृत्वा वामभागे ज्वलद्वज्रशि
लां ध्यात्वा ॐ ह्रीं पशु हुं फट् इति पाशुपतास्त्रमंत्रेण तस्यां शिलायामास्फाल्य
हस्तौ प्रक्षाल्य मूलेन जलमादाय प्रवहन्नासापुटसहस्रदलपरमामृतेनैकी भू
तं विभाव्य निर्गमय्य तेन जलेन अमृतमालिन्यै स्वाहा इति क्रोशैः स्वशिरसि त्रिः
संप्रोक्ष्य ॐ आत्मतत्त्वं शोधयामि स्वाहा ॐ विद्यातत्त्वं शोधयामि स्वाहा ॐ शिव
तत्त्वं शोधयामि स्वाहा मूलं सर्वतत्त्वं शोधयामि स्वाहा ॐ ह्रां ह्रीं हंसः श्रीमार्तंड
भैरवाय प्रकाशशक्तिसहिताय इदमर्घ्यं परिकल्पयामि स्वाहा इति त्रिरर्घ्यं कु
लसूर्याय दत्वा तस्मात् सूर्यमंडले मूलदेवीं नीत्वा तत्र विधिवद्ध्यात्वा ॐ
ह्रीं शारिकायै विद्महे सप्तात्मतत्त्वायै धीमहि तन्नः शारी प्रचोदयात् इति मूलगा

पा.
पू.
१२

यत्री अनयाचतस्रः संध्यासु सूर्यमंडले मूलदेव्या अर्घ्यं दत्वा ततः प्राणाया
मऋष्यादिकरषडंगं विधाय मूलेन यथाशक्ति जपं कृत्वा मूलगायत्री
मपि जप्त्वा पुनः प्राणायामादिना जपं समर्प्य श्रीदेवीवामहस्ते अथ सू
र्यमंडलाद्देवीं स्वहृदानीय हृदि ध्यायेत् इति संध्याविधिः अथ तर्पणम्
पूर्ववदाचम्य प्राणायामादि कृत्वा प्रोक्तविधिना विदित तीर्थजले यंत्रं वि
भाव्य तत्र देवीं हृदयात् सपरिवारामानीय षडंगेन सकलीकृत्य कुंडलिन्याः
प्रयोगेनामृतेनाभिषिंच्य विधिवत्संपूज्य पेषान्त्या ॐ ऐं ह्रीं श्रीं गुरुप्रस्तुका
नंदनाथभैरवस्वरूपंतामिति त्रिः वक्त्रोपरमगुरुप्रस्तुकानंदनाथभैरवस्व
रूपंतामिति त्रिः नैर्ऋत्यां परमाचार्यगुरुप्रस्तुकानंदनाथभैरवस्वरूपंतामिति
त्रिः वायव्ये परमेष्ठिगुरुप्रस्तुकानंदनाथभैरवस्वरूपंतामिति त्रिः त्रिः सकृद्वा

12

दिव्यौघसिद्धौघमानवौघगुरूनपिसंतर्प्य विंदौ मूलं श्रीवामदेवभैरवस
हितश्रीशारिकाभगवतीदेवीसपरिवारासानुचरासवाहनान्तर्प्यतामिति
मध्येत्रिःसंतर्प्य परिवारदेवतासंतर्प्य प्राणायामादिविधाय देवींस्वहृदिवि
सृज्य तीर्थस्वस्थानेविसृजेत् चक्रमुद्राप्रदर्श्य नमोधर्मनिदानायनमःस्व
कृतसाक्षिणे नमःप्रत्यक्षदेवायभास्करायनमोनमः इतिसूर्यायार्घ्यंदद्यात्
इतितर्पणम् ततःमूलेनजलपूर्णकमंडलुंकृत्वा मूलंस्मरन्यागगेहमा
गत्य हस्तौपादौप्रक्षाल्य आचम्य द्वारसमीपेसामान्यार्घ्यंजलगंधादिनाकृ
त्वा तेनद्वारदेवताःसमर्चयेत् यथा ॐह्रींद्वारश्रियैनमः ऊर्ध्वे गंगणपतये
नमः दक्षे क्षंक्षेत्रपालायनमः वामे धंधात्रेनमः दक्षे वंविधात्रेनमः वामे
गंगंगायैनमः दक्षे यंयमुनायैनमः वामे शंशंखनिधयेनमः दक्षे पंपद्मनि।

पूजा. ययेनमः वामे अस्त्रायफट् इति नमः देहल्यां वास्तुपुरुषायनमः मध्ये इति समभ्य
प्र. र्च्य वामांगसंकोचेन वामपादपुरःसरमंतःप्रविश्य तत्रासनमास्तीर्य तत्र ह्रीं
१३ आधारशक्त्यैनमः इति संपूज्य अस्य श्री आसनशोधनमंत्रस्य मेरुपृष्ठऋषिः
13 सुतलं छंदः कूर्मो देवता आसनशोधने विनियोगः मेरुपृष्ठऋषये नमः शिर
सि सुतलं छंदसे नमो मुखे कूर्मो देवतायै नमो हृदि आसनशोधने विनियोगः
सर्वांगेषु पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता त्वं च धारय मां देवि पवित्रं
कुरु चासनं इत्यभिमंत्र्य संविदं यथामंत्रं स्वीकुर्यात् संविदे ब्रह्मसंभूते ब्रह्म
पुत्रि सदानघे ब्राह्मणानां च तृप्त्यर्थं पवित्रा भव सर्वदा ओं ब्राह्मण्यै नमः स्वाहा
सिद्धमूले नये देवि हीनबुद्धि प्रबोधिनि राजप्रजावशंकारि शत्रुपक्षनिसूदिनि ऐं
क्षत्रियायै नमः स्वाहा अज्ञानेंधन दीप्ताग्ने ज्ञानाग्नि ब्रह्मरूपिणि आनंदस्याहुतिं

प्रीतिंसमागतानंप्रयच्छमे ह्रींवैष्णायैनमःस्वाहा नमस्यामिनमस्यामियो
गमार्गप्रदर्शिनि त्रैलोक्यविजयीमातासमाधिफलदाभव ह्लींमूर्द्धायैनमः
स्वाहा इत्यभिमंत्र्य ॐ अमृतेअमृतोद्भवेअमृतवर्षिणिअमृतमाकर्षय २ सि-
द्धिंदेहिश्रीशारिकाभगवतीपदंमेवशमानयस्वाहा इतितदुपरिसमयामूलंचा-
जप्त्वा येनमुद्रयाःस्तीकृत्य योनिमुद्रांप्रदर्श्य आगच्छ २ संतिष्ठ २ सन्निधेहि २
सन्निरुध्यस्व २ संमुखीभव २ इत्यावाहनादिमुद्राःप्रदर्श्य अवगुंठ्य छोटिकाभि
दशादिग्बंधनंविधाय ऐंवदवदवाग्वादिनिममजिह्वाग्रेस्थिरीभवसर्ववशंक
रिस्वाहा इत्यनेनमुखेजुहुयात् ततश्चानंदमयोभूत्वा अपसर्पन्तुतेभूतायेभू
ताभुविसंस्थिताः येभूताविघ्नकर्तारस्तेनश्यंतुशिवाज्ञया पाषांडकारिणोभू
ताभूताभूम्यंतरिक्षगाः दिविलोकेस्थितायेचतेनश्यंतुशिवाज्ञया इतितर्जनी

सा॰ मध्यमाभ्यामूर्ध्वोर्ध्वंतालत्रयदानेनवामपार्ष्णिघातत्रयेणदिग्व्यवस्थितत्रिवि
सू॰ धविघ्नानुत्सार्य छोटिकाभिर्दिग्बंधंकृत्वा चतुर्दिक्षुवह्निप्राकारंसंचिंत्य
१४ प्राणायामत्रयंकुर्यात् तत्रप्रणवंषोडशवारमुच्चरन् दक्षनामाकनिष्ठा।
भ्यांवामंपुटंचनिरुध्य दक्षेणपवनंकुंभयेत् ततस्तमेवद्वात्रिंशद्वारमुच्चर
14 न् वामंपुटंतथैवनिरुध्य दक्षेणपवनंरेचयेत् इत्येकःप्राणायामः एषएव
विपर्ययेनद्वितीयः प्रथमवत्तृतीयः इत्थंप्राणायामत्रयेणनिरस्तसकलक
ल्मषंस्वदेहंदेवताराधनयोग्यंपविभाव्य भूतशुद्धिंकुर्यात् मूलाधाराद्धंसइतिमं
त्रेणकुंडलिनींपृथिव्यासहस्वाधिष्ठानेसमानीय तत्रजलेपृथ्वींलीनांविभाव्य
तस्माज्जलेनसहमणिपूरेसमानीय तत्रवह्नौजलंलीनंविभाव्य तस्माद्वह्निना।
सहाऽनाहतेसमानीय तत्रवायौवह्निंलीनंविचिंत्य तस्माद्वायुनासहविशुद्धे

समानीय तत्रस्थाकाशे वायुं लीनं विचिंत्य तस्मादाकाशेन सहहृत्वा चक्रे समा
नीय तत्रस्थमनस्याकाशं लीनं संचिंत्य मनो नादे लीनं विभाव्य ध्वनौ ध्वनिं सम
र्प्य सहस्रदलकर्णिकास्थचंद्रमंडलमध्यगतत्रिकोणांतर्गततेजोमयविंदुरू
पपरमशिवे तां समर्प्य प्राणायामविधिना यमिति वायुवीजं धूम्रवर्णं षोडश।
वारं जपन् तत्र शरीरं पापपुरुषं वामकुक्षिस्थितं पापपुरुषं कज्जलप्रभं ब्रह्मह
त्याशिरस्कं च स्वर्णस्तेयभुजद्वयं सुरापानहृदायुक्तं गुरुतल्पकटिद्वयं तत्सं
सर्गिपदद्वंद्वमंगप्रत्यंगपातकं उपपातकरोमाणं रक्तश्मश्रुविलोचनं खड्गचर्म
धरं कुद्धं पापं कुक्षौ विचिंतयेत् इति विचिंत्य तं संशोष्य रमिति वह्निवीजं रक्तव
र्णं चतुःषष्टिवारं जपन् भस्मैव संदह्य वमित्यमृतवीजं शुक्लवर्णं सहस्रारे विचिंत्य
द्वात्रिंशद्वारं जपंस्तद्गावामृतद्भस्मानिष्पापं शरीरमुत्पाद्य ललाटस्थलमिति

प्रा.	पृथ्वीवीजेनपीतवर्णेनसदृढीकृत्य हमित्याकाशवीजेनव्यापकत्वंविचिंत्य क्रीं
ह.	मितिमूलस्थवीजेनसैसूर्यविधाय सोहमितिमंत्रेणकुंडलिनीमसृतलोलीभूता
१५	पंचमहाभूतानिजीवात्मानंचब्रह्मपथेनस्वस्थानेनियोजयेत् ततोदेवतारूपमा
त्मानंविचिंत्य हृदिहस्तंदत्वा इतिभूतशुद्धिः अथप्राणप्रतिष्ठा ॐअस्यश्रीप्रा
णप्रतिष्ठामंत्रस्य श्रीब्रह्मविष्णुशिवाऋषयः ऋग्यजुःसामानिछंदांसि पराप्रा
णशक्तिर्देवता आंवीजं ह्रींशक्तिः क्रोंकीलकं ममश्रीप्राणप्रतिष्ठार्थेविनियोगः
इतिकृतांजलिःसन्न्यसेत् श्रीब्रह्मविष्णुशिवऋषिभ्योनमःशिरसि ऋग्यजुः
सामछंदोभ्योनमोमुखे पराप्राणशक्तिर्देवतायैनमोहृदये आंवीजायनमः
गुह्ये ह्रींशक्तयेनमःपादयोः क्रोंकीलकायनमःनाभौ ममप्राणप्रतिष्ठार्थेवि
नियोगःसर्वांगेषु इतिऋष्यादिन्यासः अथकरन्यासः ॐआंह्रींक्रोंअंकंखंगं।

घं ङं आकाशवाय्वग्निसलिलपृथिव्यात्मने अं अंगुष्ठाभ्यां नमः ॐ श्रां ह्रीं क्रौं इं चं
छं जं झं ञं शब्दस्पर्शरूपरसगंधात्मने ईं तर्जनीभ्यां स्वाहा ॐ श्रां ह्रीं क्रौं उं टं ठं डं ढं।
णं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने ऊं मध्यमाभ्यां वषट् ॐ श्रां ह्रीं क्रौं तं थं दं धं नं वा।
क्पाणिपादपायूपस्थात्मने ऐं अनामिकाभ्यां हुं ॐ श्रां ह्रीं क्रौं ओं पं फं बं भं मं वचनादा
नविसर्गगमनानंदात्मने औं कनिष्ठिकाभ्यां वौषट् ॐ श्रां ह्रीं क्रौं अं यं रं लं वं शं षं सं
हं ळं क्षं मनोबुद्ध्यहंकारचित्तात्मने अः करतलकरपृष्ठाभ्यां फट् इति करन्यासः
अथ षडंगः ॐ श्रां ह्रीं क्रौं अं कं खं गं घं ङं आकाशवाय्वग्निसलिलपृथिव्यात्मने आं।
हृदयाय नमः ॐ श्रां ह्रीं क्रौं इं चं छं जं झं ञं शब्दस्पर्शरूपरसगंधात्मने ईं शिरसे स्वाहा
ॐ श्रां ह्रीं क्रौं उं टं ठं डं ढं णं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने ऊं शिखायै वषट् ॐ श्रां ह्रीं
क्रौं एं तं थं दं धं नं वाक्पाणिपादपायूपस्थात्मने ऐं कवचाय हुं ॐ श्रां ह्रीं क्रौं ओं पं फं

प्रा॰ पू॰ १९ बं भं मं वचनादानविसर्गगमनानंदात्मने औं नेत्रत्रयाय वौषट् ॐ ग्रां ह्रीं क्रों अं यं रं
लं वं शं षं सं हं ळं क्षं: मनोबुद्ध्यहंकारचित्तात्मने अः अस्त्राय फट् इति षडंगन्यासः
ततः नाभ्यादिपादद्वयांतं ग्रां नमः हृदादिनाभ्यंतं ह्रीं नमः मूर्धादिहृदंतं क्रों
16 नमः हृदयकमलमध्ये ॐ ऐं ह्रीं श्रीं यं त्वगात्मने नमः पूर्वदले ४ रं असृगात्मने न
मः पश्चिमे ४ लं मांसात्मने नमः आग्नेये ४ वं मेदसात्मने नमः वायव्ये ४ शं अस्थ्या
त्मने नमः ईशाने ४ षं मज्जात्मने नमः नैर्ऋते ४ सं शुक्रात्मने नमः उत्तरे हं प्राणा
त्मने नमः दक्षिणे ४ ळं जीवात्मने नमः पुनः कर्णिकामध्ये ४ क्षं: परमात्मने न
मः इति विन्यस्य ध्यायेद्यथा ॐ रक्ताब्धिपोतारुणपद्मसंस्थां पाशांकुशावि
क्षुशरासबाणान् शूलं कपालं दधतीं कराब्जै रक्तां त्रिनेत्रां प्रणमामि देवीं
इति ध्यात्वा हृदि हंसं निधाय ॐ ग्रां ह्रीं क्रों यं रं लं वं शं षं सं हं ळं क्षं: हंसः।

सोहं श्रीशारिकाभगवतीप्राणाइहप्राणाः ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं ळं
क्षं हंसः सोहं जीव इह स्थितः ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं ळं क्षं हंसः सोहं
सर्वेंद्रियाणि इह स्थितानि ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं ळं क्षं हंसः सोहं वा।
ङ्मनस्त्वक्चक्षुःश्रोत्रघ्राणप्राणाइहागत्य सुखंचिरंतिष्ठंतु स्वाहा इति प्राण।
प्रतिष्ठां विधाय मातृकान्यासं कुर्यात् स्वरैः पूरकः कादिमांतैः कुंभकः या
दिभिरेचकः तत्रादावंतर्मातृकान्यासः अस्य श्रीअंतर्मातृकान्यासस्य ब्रह्मा
ऋषिः गायत्रीछंदः श्रीअंतर्मातृकासरस्वतीदेवता हलोबीजानि स्वराःशक्त
यः अव्यक्तंकीलकं ममश्रीशारिकाभगवतीमंत्रांगत्वेनन्यासेविनियोगः
इति कृतांजलिः स्मृत्वान्यसेत् ब्रह्मऋषयेनमःशिरसि गायत्रीछंदसेनमोमु
खे श्रीअंतर्मातृकासरस्वतीदेवतायैनमःहृदि हल्भ्योबीजेभ्योनमःगुह्ये

स्वाः शक्तिभ्योनमः पादयोः अअक्षकीलकायैनमः नाभौ न्यासेविनियोगः
सर्वांगेषु इतिऋष्यादिन्यासः अथकरन्यासः ॐ ऐं ह्रीं श्रीं अंकंखंगंघंङं आं
अंगुष्ठाभ्यांनमः ॐ ऐं ह्रीं श्रीं इंचंछंजंझंञं ईं तर्जनीभ्यांस्वाहा ॐ ऐं ह्रीं श्रीं उंटं
ठंडंढंणंऊं मध्यमाभ्यांवषट् ॐ ऐं ह्रीं श्रीं एंतंथंदंधंनं ऐं अनामिकाभ्यांहुं ॐ ऐं
ह्रीं श्रीं ओं पंफंबंभंमं औं कनिष्ठिकाभ्यांवौषट् ॐ ऐं ह्रीं श्रीं अंयंरंलंवंशंषंसं
हंलंक्षं अः करतलकरपृष्ठाभ्यांफट् इतिकरन्यासः अथषडंगन्यासः ॐ ऐं
ह्रीं श्रीं अंकंखंगंघंङं आं हृदयायनमः ॐ ऐं ह्रीं श्रीं इंचंछंजंझंञं ईं शिरसेस्वाहा
ॐ ऐं ह्रीं श्रीं उंटंठंडंढंणंऊं शिखायैवषट् ॐ ऐं ह्रीं श्रीं एंतंथंदंधंनं ऐं कवचाय।
हुं ॐ ऐं ह्रीं श्रीं ओं पंफंबंभंमं औं नेत्रत्रयायवौषट् ॐ ऐं ह्रीं श्रीं अंयंरंलंवंशंषंसंहं
लंक्षं अः अस्त्रायफट् इतिषडंगन्यासः अथध्यानं ॐ व्योमेहोरसनाएक

र्णिकमचांहंहैस्फुरत्केसरं पत्रान्तर्गतपंचवर्गयशलार्णादित्रिवर्गक्रमात्‌ आ
शास्वस्त्रिषु लोतलोगलियुजा क्षोणीपुरेणावृतं वर्णाब्जं शिरसि स्थितं विषगद
प्रध्वंसि मृत्युंजयं इति वर्णकमलं शिरसि ध्यात्वा ॐ ऐं ह्रीं श्रीं अं नमः ॐ आं नमः
ॐ इं नमः ॐ ईं नमः ॐ उं नमः ॐ ऊं नमः ॐ ऋं नमः ॐ ॠं नमः ॐ ऌं नमः ॐ ॡं नमः
ॐ एं नमः ॐ ऐं नमः ॐ ओं नमः ॐ औं नमः ॐ अं नमः ॐ अः नमः कंठे षोडशदले ॐ
ऐं ह्रीं श्रीं कं नमः ॐ खं नमः ॐ गं नमः ॐ घं नमः ॐ ङं नमः ॐ चं नमः ॐ छं नमः ॐ जं न
मः ॐ झं नमः ॐ ञं नमः ॐ टं नमः ॐ ठं नमः अनाहते द्वादशदले ॐ ऐं ह्रीं श्रीं डं नमः
ॐ ढं नमः ॐ णं नमः ॐ तं नमः ॐ थं नमः ॐ दं नमः ॐ धं नमः ॐ नं नमः ॐ पं नमः ॐ फं नम
नाभौ दशदले ॐ ऐं ह्रीं श्रीं वं नमः भं नमः ॐ मं नमः ॐ यं नमः ॐ रं नमः ॐ लं नमः स्वाधि
ष्ठाने षट्दले ॐ ऐं ह्रीं श्रीं वं नमः ॐ शं नमः ॐ षं नमः ॐ सं नमः मूलाधारे चतुर्दले

शा. ॐ ऐं ह्रीं श्रीं हं नमः ॐ ऐं ह्रीं श्रीं क्षं नमः भ्रूमध्ये द्विदले इत्यंतर्मातृकान्यासः अथ ब
सू. हिर्मातृकान्यासः तत्रादौ प्राणायामः स्वरैः पूरकः कादिभिः कुंभकः यादिभिः रेच
१८ कः अस्य श्रीबहिर्मातृकान्यासस्य ब्रह्मा ऋषिः गायत्रं छंदः श्रीबहिर्मातृकासर
स्वती देवता हलो बीजानि स्वराः शक्तयः अव्यक्तं कीलकं मम श्रीशारिकाभगव
तीमंत्रांगत्वेन न्यासे विनियोगः इति कृतांजलिः सन्न्यसेत् ॐ ब्रह्मऋषये नमः
शिरसि ॐ गायत्रं छंदसे नमो मुखे ॐ श्रीबहिर्मातृकासरस्वती देवतायै हृदि ॐ ह
ल्भ्यो बीजेभ्यो नमो गुह्ये ॐ स्वरेभ्यः शक्तिभ्यो नमः पादयोः ॐ अव्यक्ताय कीलकाय।
नमः नाभौ मम श्रीशारिकाभगवतीमंत्रांगत्वेन न्यासे विनियोगः सर्वांगेषु इति ऋ
ष्यादिन्यासः अथ करन्यासः ॐ ऐं ह्रीं श्रीं अं कं खं गं घं ङं आं अंगुष्ठाभ्यां नमः ॐ ऐं ह्रीं
श्रीं इं चं छं जं झं ञं ईं तर्जनीभ्यां स्वाहा ॐ ऐं ह्रीं श्रीं उं टं ठं डं ढं णं ऊं मध्यमाभ्यां वषट् ॐ ऐं

18

ह्रीं श्रीं पं तं थं दं धं नं ऐं अनामिकाभ्यां हुं ॐ ऐं ह्रीं श्रीं ॐ पं फं बं भं मं औं कनिष्ठिकाभ्यां वौ
षट् ॐ ऐं ह्रीं श्रीं अं यं रं लं वं शं षं सं हं ळं क्षं अः करतलकरपृष्ठाभ्यां फट् इति करन्या
सः अथ षडंगन्यासः ॐ ऐं ह्रीं श्रीं अं कं खं गं घं ङं आं हृदयाय नमः ॐ ऐं ह्रीं श्रीं इं चं छं
जं झं ञं ईं शिरसे स्वाहा ॐ ऐं ह्रीं श्रीं उं टं ठं डं ढं णं ऊं शिखायै वषट् ॐ ऐं ह्रीं श्रीं एं तं।
थं दं धं नं ऐं कवचाय हुं ॐ ऐं ह्रीं श्रीं ओं पं फं बं भं मं औं नेत्रत्रयाय वौषट् ॐ ऐं ह्रीं श्रीं
अं यं रं लं वं शं षं सं हं ळं क्षं अः अस्त्राय फट् इति षडंगन्यासः अथ ध्यानं ॐ पंचाश
द्वर्णभेदैर्विहितवदनदोःपादहृत्कुक्षिवक्षो देशांभास्वत्कपर्दाकलितशशिक।
लामिंदुकुंदावदातां अक्षस्रक्कुंभचिंतालिखितवरकरां त्रीक्षणां पद्मसंस्था मच्छा
कल्पामतुच्छस्तनजघनभरां भारतीं तां नमामि इति ध्यात्वा दक्षोर्ध्वकरमारभ्य।
दक्षाधःकरपर्यंतं मातृकाध्यानं ॐ ऐं ह्रीं श्रीं क्लौं अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं

शा.
ह.
१५

19

ॐऔंअंअः कंखंगंघंङं.चंछंजंझंञं टंठंडंढंणं तंथंदंधंनं पंफंबंभंमं यंरंलंवंशंषं
संहंळंक्षंः स्हौंः श्रींह्रींऐंॐनमः इतिमूर्धादिपादांतव्यापकंविन्यस्य न्यासंकुर्यात्
ॐऐंह्रींश्रींअंनमः शिरसि ४आंनमः मुखवृत्ते ४इंनमः दक्षनेत्रे ४ईंनमः वामे ४
उंनमः दक्षकर्णे ४ऊंनमः वामे ४ऋंनमः दक्षनसि ४ॠंनमः वामे ४ऌंनमः दक्ष
गंडे ४ॡंनमः वामे ४एंनमः ऊर्ध्वोष्ठे ४ऐंनमः अधरे ४ओंनमः ऊर्ध्वदंतेषु ४औंन
मः अधोदंतेषु ४अंनमः ललाटे ४अः नमः जिह्वायां ४कंनमः दक्षपाणिमूले
४खंनमः कूर्परे ४गंनमः मणिवंधे ४घंनमः अंगुलिमूले ४ङंनमः अंगुल्यग्रे
४चंनमः वामपाणिमूले ४छंनमः कूर्परे ४जंनमः मणिवंधे ४झंनमः अंगुलि
मूले ४ञंनमः अंगुल्यग्रे ४टंनमः दक्षपादकक्षे ४ठंनमः जानुनि डंनमः गुल्फे
४ढंनमः अंगुलिमूले ४णंनमः अंगुल्यग्रे ४तंनमः वामपादकक्षे ४थंनमः

जानुनि ॐ दं नमः गुल्फे ॐ धं नमः अंगुलिमूले ॐ नं नमः अंगुल्यग्रे ॐ पं नमः
दक्षपार्श्वे ॐ फं नमः वामे ॐ बं नमः पृष्ठे ॐ भं नमः नाभौ ॐ मं नमः जठरे ॐ यं त्व
गात्मने नमः हृदये ॐ रं असृगात्मने नमः दक्षांसे ॐ लं मांसात्मने नमः ककुदि
ॐ वं मेदसात्मने नमः वामांसे ॐ शं अस्थ्यात्मने नमः हृदादिदक्षपाण्यंते ॐ षं
मज्जात्मने नमः हृदादिवामपाण्यंते ॐ सं शुक्रात्मने नमः हृदादिदक्षपादांते
ॐ हं प्राणात्मने नमः हृदादिवामपादांते ॐ लं जीवात्मने नमः पादादिनाभ्यंते
ॐ क्षं परमात्मने नमः नाभ्यादिमूर्धांते इति बहिर्मातृकान्यासः अथ तत्त्वन्यासः
ॐ मूलं आत्मतत्त्वाय नमः हृदयाय नमः ॐ मूलं विद्यातत्त्वाय नमः शिरसे स्वाहा
ॐ मूलं शिवतत्त्वाय नमः शिखायै वषट् ॐ मूलं गुरुतत्त्वाय नमः कवचाय हुं ॐ मूलं श
क्तितत्त्वाय नमः नेत्राभ्यां वौषट् ॐ मूलं शिवशक्तितत्त्वाय नमः अस्त्राय फट् इति तत्त्वन्यास
:

धा. अथमंत्रन्यासः ॐनमःशिरसि ह्रींनमःललाटे श्रींनमःनेत्रयोः ह्लंनमःकर्णयोः
सू. फ्रांनमःनासाग्रे ञ्रांनमःमुखे पांनमःकंठे शांनमःवक्षसि रिंनमःभुजयोः
२. कांनमःनाभौ यैंनमःलिंगे नंनमःजान्वनोः मंःनमःपादयोः इतिमंत्रन्या
२० सः अथाष्टदेवीन्यासः अंआंइंईंकंखंगंघंङं-अमायैनमःशिरसि उंऊंऋंॠं
चंछंजंझंञंकामायैनमःमुखे लृंॡंएंऐंटंठंडंढंणंवार्वीण्यैनमःकंठे ओंऔं
अंअंःतंथंदंधंनंढकधारिण्यैनमःवक्षसि अंआंइंईंपंफंबंभंमंतारायैनमः
नाभौ उंऊंऋंॠंयंरंलंवंपार्वत्यैनमःलिंगे लृंॡंएंऐंशंषंसंहंयक्षिण्यैनमः
जान्वोः ओंऔंअंअःलंक्षंःशारिकायैनमःपादयोः इत्यष्टदेवीन्यासः अथायु
धन्यासः वरायनमःदक्षाधःकरे खड्गायनमःदक्षे चक्रायनमःवामे
अभयायनमःवामोर्ध्वः इत्यायुधन्यासः ततः पुनःषडंगन्यासःसंप्रदायेन

ॐह्रांश्रांहृदयायनमः ॐह्रींश्रींशिरसेस्वाहा ॐह्रूंश्रूंशिखायैवषट् ॐ
ह्रैंश्रैंकवचायहुं ॐह्रौंश्रौंनेत्रत्रयायवौषट् ॐह्रःश्रःअस्त्रायफट् इतिन्यासैर्दे
हविन्यस्य मूलाधारेमूलविद्यांविद्युत्कोटिसमप्रभां सूर्यकोटिप्रतीकाशांचं
द्रकोटिप्रभांप्रिये बिसतंतुस्वरूपांतांबिंदुत्रिवलयांप्रिये ऊर्ध्वशक्तिनिपाते
नसहजेनवरानने मूलशक्तिदृढत्वेनमध्यशक्तिप्रबोधतः परमानंदसंदो
हस्यानंदोचिंतयेत्परां श्रीदेवीपूर्वोक्तप्रकारेणस्वहृत्कमलेध्यात्वा मानसोप
चारैराराध्य लंपृथिव्यात्मकंगंधंसमर्पयामिनमः हंआकाशात्मकंपुष्पंसमर्पया
मिनमः यंवाय्वात्मकंधूपंसमर्पयामिनमः रंवह्न्यात्मकंदीपंसमर्पयामिनमः वंअमृ
तात्मकंनानानैवेद्यंसमर्पयामिनमः संसर्वात्मकंफलमूलतांबूलादिकंसमर्पया
मिनमः नैवेद्यावसरेःतवेष्टदेवंकुर्याद्यथा मूलाधारे आत्मांतरात्मपरमात्मा।

पु. त्मानात्मेत्यात्मचतुष्टयं सचतुरस्रं कुंडल्याग्निसमुज्ज्वलं कुंडं ध्यात्वा तत्र श्रीदे
पू. वीं ध्यात्वा तन्मुखे मूलं तेऽहं तां जुहोमि स्वाहा इत्याद्यहंतां ममसत्यं पैशु।
२१ न्यं कामं क्रोधं लोभं मोहं मदं मात्सर्यं जुहोमि स्वाहा सुषुम्णा स्रुचा क्रम
नः स्रुवेण प्रत्येकं हुत्वा अथवा धर्माधर्म हविर्दीप्ते स्वात्माग्नौ मनसा स्रु
चा सुषुम्णावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहं इति कृत्वा पुनः हृदयकम।
ले देवीं ध्यात्वा उत्तरापोशानादि सर्वोपचारैराराध्य मूलं यथाशक्ति जपित्वा
प्राणायामादिना जपं समर्प्य श्रीगुरुं प्रणम्य पीठपूजां न्यासेन स्वदेहे कुर्यात्
ॐ मंडूकाय नमः कालाग्निरुद्राय नमः मूलप्रकृत्यै नमः आधारशक्त्यै नमः
कमठाय नमः अनंताय नमः पृथिव्यै नमः सुधार्णवाय नमः रत्नद्वीपाय न
मः कल्पवनाय नमः नंदनोद्यानाय नमः चिंतामणिमंडपाय नमः मणि

वेदिकायैनमः श्मशानायनमः रत्नसिंहासनायनमः दित्तः नानाऋनिग
णेभ्योनमः नानादेवेभ्योनमः धर्मायनमः दत्तांसे ज्ञानायनमः वामांसे वै
राग्यायनमः वामोरौ ऐश्वर्यायनमः दत्तोरौ अधर्मायनमः दत्तऊत्तौ अज्ञानाय
नमः दत्तपृष्ठे अवैराग्यायनमः वामपृष्ठे अनैश्वर्यायनमः वामऊत्तौ शेषायन
मः पद्मायनमः प्रकृतिमयपत्रेभ्योनमः विकृतिमयकेसरेभ्योनमः पंचाशा
द्वीजभूषितकर्णिकायैनमः सूर्यमंडलायनमः सोममंडलायनमः वैश्वानर
मंडलायनमः संसत्वायनमः रंरजसेनमः तंतमसेनमः आंआत्मनेनमः अंअं
तरात्मनेनमः पंपरमात्मनेनमः ह्रींज्ञानात्मनेनमः पत्रेषु वामायैनमः ज्येष्ठा
यैनमः रौद्र्यैनमः अंविकायैनमः इच्छायैनमः ज्ञानायैनमः क्रियायैनमः
कुब्जिकायैनमः चित्रायैनमः विषघ्निकायैनमः हृतयैनमः आनंदायैनमः

शा. मध्ये मनोन्मन्यै नमः ऐं परायै नमः ऐं अपरायै नमः ऐं चिद्रूपायै नमः ह्सौः स
सू. दाशिवमहाप्रेतपद्मासनाय नमः इति पीठं विन्यस्य तत्रैव हृदये स्वाभेदेन श्री
२२ शारिकां भगवतीं ध्यायेत् ॐ बालार्ककोटिद्युतिमिंदुचूडां वरासिचक्राभयवा
हुमाद्यां सिंहाधिरूढां शिववामदेहलीनां भजे चेतसि शारिके शीम् इति शा
रिकां विचिन्त्य वध्यामिकेऽकर्णे ते वह्नमतिर्भवभवोच्छित्तै प्राणापानौ च क्रम्यौ ते
प्राणमनोसि सर्वं चिरं तिष्ठन्तु स्वाहा मानसोपचारैराराध्य मनसा यथाशक्ति
जपहोमादिकं विधाय कामकलारूपं स्वात्मानं विचिन्त्य स्वदेहं गंधादिभिर
लंकृत्य कलशस्थापनं कुर्यात् स्वदक्षे त्रिकोणं वृत्तबिंबमंडलं भूमौ विरचा
य्य तत्राधारशक्त्यै नमः इति संपूज्य तत्राधारं निधाय तदुपरि अस्त्राय फट् इ
ति मंत्रेण शोधितं नमः इति पूरितं पात्रं शंखं वा संस्थाप्य तत्र गो गो इत्यादिनी

र्थमावाह्य ॐमितिगंधादीन्निक्षिप्य वह्निसूर्यसोमकलाभ्योनमः इतिसं
पूज्य धेनुमुद्रांप्रदर्श्य स्वमंत्रेणसंपूजयेत् इतिसामान्यार्घ्यंविधाय स्ववा
मभागेषट्कोणांतर्गतत्रिकोणवृत्तबिंदुंवाह्य वृत्तचतुरस्रंविधाय सामा
न्यार्घोदकेन तंमंडलमभ्युक्ष्य तत्राधारशक्तिभ्योनमः इत्याधारशक्तीः सं
पूज्य तत्राधारंप्रक्षाल्य मंडलोपरिसंस्थाप्य रंवह्निमंडलायदशकलात्म
नेनमः इतिप्रपूज्य फट् इतिकलशंप्रक्षाल्य कारणेनप्रपूर्य रक्तवस्त्रमाल्या
दिनासंभूष्य देवीबुद्ध्यासंस्थाप्य अंअर्कमंडलायद्वादशकलात्मनेनमः इति
कलशंसंपूज्य ॐसोममंडलायषोडशकलात्मनेनमः इतिद्रव्यंसंपूज्य फ
ट् इतिसंरक्ष्य हुमित्यवगुंठ्य मूलेनसंवीक्ष्य नमइत्यभ्युक्ष्य मूलेनगंधमा
घ्राय कुंभेपुष्पंदत्वा शापमोचनंकुर्यात् एकमेवपरंब्रह्मस्थूलसूक्ष्म।

प्रा. मयंप्रुवं कचोद्भवांब्रह्महत्यांतेननतेनाशयाम्यहं सूर्यमंडलसंभूतेवरुणा
पू. लयसंभवे अमावीजमयेदेविशुक्रशापाद्विमुच्यतां वेदानांप्रणवोवीजंब्र
२१ ह्मानंदमयोयदि तेनसत्येनहेदेविब्रह्महत्याव्यपोहतु इतित्रिः ततः वांवीं
वूंवैंवौंवः ब्रह्मशापमोचितायैसुरादेव्यैनमः इत्यपित्रिः ॐह्रींश्रींक्रांक्रींक्रूं
क्रैंक्रौंक्रः सुराकृष्णशापमोचय २ अमृतंस्रावय २ स्वाहा इतित्रिः हंसःशु
चिषद्वसुरंतरिक्षसद्धोतावेदिषतिथिर्दुरोणसत् नृषद्वरसदृतसद्व्योम।
सदब्जागोजाऋतजाअद्रिजाऋतं इत्यपित्रिः आनंदभैरवं अष्टादशभुजंत्रि
नयनंपंचवक्त्रंसुरादेवीसहितंध्यात्वा हसक्षमलवरयूं आनंदभैरवा।
यवौषट् सहक्षमलवरयीं सुरादेव्यैवौषट् इतिदेवदेव्योस्त्रिः संपूज्य द्रव्य
मध्येदक्षिणावर्तेनत्रिःपंक्त्या अं १६ कं १६ थं १६ इतिशक्तिचक्रंविलिख्य

तन्मध्ये हंतंच तेद्वयमध्येऽमृतंविचिंत्य येनुमुद्रयामृतीकृत्य वमितिवस्तथा
वीजंमूलमप्यष्टधाव्यटंष्टत्वा पठित्वा ग्रात्मश्रीचक्रयोर्मध्ये त्रिकोणषट्को।
णवृत्तचतुरस्त्रंविलिख्य चतुरस्त्रे पूर्णगिरिपीठायनमः उड्डियानपीठाय।
नमः कामरूपपीठायनमः जालंधरपीठायनमः इतिसंपूज्य षट्कोणेष
डंगंसंपूज्य त्रिखंडेनत्रिकोणाग्रदक्षोत्तरंसंपूज्य मध्ये ग्राधारशक्त्यैनमः
इतिसंपूज्य त्रिकोणगर्भेयंत्रिकोसंस्थाप्य नमइतिसामान्यार्घ्यजलेनाभ्युक्ष्य
यंधूम्रार्चिषेनमः रंऊष्मायैनमः लंज्वलिन्यैनमः वंज्वालिन्यैनमः शंविस्फु
लिंगिन्यैनमः षंसुश्रियैनमः संस्वरूपायैनमः हंकपिलायैनमः लंहव्यवा
हायैनमः क्षंःकव्यवाहायैनमः इतिसंपूज्य रंवह्निमंडलायदशकलात्मनेन
मः इतिसंपूज्य षट्कोणेषडंगेनसंपूज्य मध्येमूलेनदेवींसंपूज्य पात्रंफट्

प्रा॰ इतिप्रक्षाल्य यंत्रिकोपरिसंस्थाप्य तत्र कंभंतपिन्यैनमः खंभंतापिन्यैनमः गंफं
सू॰ धूम्रायैनमः घंपंमरीच्यैनमः ङंनंज्वालिन्यैनमः चंधंरुच्यैनमः छंदंसुप्रभा
२४ यैनमः जंथंभोगदायैनमः झंतंविश्वायैनमः ञंणंबोधिन्यैनमः टंढंधारि।
ण्यैनमः ठंडंक्षमायैनमः इति अंअर्कमंडलायद्वादशकलात्मनेनमः इति
संपूज्य त्रिकोणाद्वहिर्षट्कोणंपात्रेविलिख्य समस्तव्यस्तमंत्रेणसंपूज्य वरु।
णबीजंमूलंविलोममातृकांचपठन्नमृतेनत्रिकोणंप्रपूर्य जलेनवभागमेकं
प्रपूर्य तत्रसुगंधादिनिक्षिप्य अंअमृतायैनमः आंआनंदायैनमः इंपूषायैनमः
ईंतुष्ट्यैनमः उंपुष्ट्यैनमः ऊंरत्यैनमः ऋंधृत्यैनमः ॠंशशिन्यैनमः लृंचंद्रिका
यैनमः लॄंकांत्यैनमः एंज्योत्स्नायैनमः ऐंश्रियैनमः ओंप्रीत्यैनमः औंअंगदा
यैनमः अंपूर्णायैनमः अः पूर्णामृतायैनमः इति उंषोडशकलात्मनेसोम

मंडलाय नमः इति संपूज्य पूर्ववद्घटं त्र्यस्रे विलिख्य त्रिकोणं त्रिरेखायाम्
अं १६ कं १६ थं १६ इति त्रिर्विलिख्य मूलं खंडत्रयेण त्रिकोणं संपूज्य षट्कोणे
षडंगं च गंगेत्यादि तीर्थमावाह्य आनंदभैरवभैरव्यौ स्वमंत्रेण संपूज्य पूर्वादि
स्रूं गगनरत्नेभ्यो नमः पूर्वे स्रूं स्वर्गरत्नेभ्यो नमः दक्षिणे स्रूं मर्त्यरत्नेभ्यो नमः
पश्चिमे स्रूं पातालरत्नेभ्यो नमः उत्तरे स्रूं नागरत्नेभ्यो नमः मध्ये इति संपूज्य मां
सादि संशोधयेत् यथा तत्र मांसादि पात्रमानीय अस्त्राय फडिति सामान्यार्घोदके
नाभ्युक्ष्य हृन्मित्रवरुणौ वमित्यमृतमुद्रया अमृतीकृत्य तालत्रयेण दिशः संबध्य
तदुपरि मूलं सप्तधा प्रजप्य प्रतद्विष्णुस्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठः
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियंति भुवनानि विश्वा इति ऋचा इति मांसशोधनं
त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं उर्वारुकमिव बंधनान्मृत्योर्मोक्षीय मामृतात्

शा. इति मीनशोधनम् तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः दिवीव चक्षुराततं तद्वि
पू. प्रासो विपण्यवो जागृवांसः समिन्धते विष्णोर्यत्परमं पदं इति मुद्राशोधनम् विष्णु
२५ र्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु आसिंचतु प्रजापतिर्धाता गर्भं दधातु ते गर्भं
धेहि सिनीवाली गर्भं देहि सरस्वति गर्भं देह्यश्विनौ देवावादत्तं पुष्करस्रजं ॐ पेंक्लिः
फ्रें ब्लेंसः अमृते अमृतोद्भवे अमृतवर्षिणि अमृतं स्रावय २ स्वाहा इति कुंडगोलादि
कं संशोध्य अवगुंठ्य अमृतमुद्रया अमृतीकृत्य तदुपरि मत्स्यमुद्रया मूलं संजप्य तत्र
देवीमावाह्य तालत्रयं दिग्बंधं विधाय अवगुंठ्य अमृतीकृत्य योनिं प्रदर्श्य ब्लौंः
नमः इति संजप्य शंखमुद्रां प्रदर्श्य षडंगेन सकलीकृत्य मत्स्यमुद्रया पात्रमा
च्छाद्य मूलं दशधा जप्त्वा पात्रे देवीरूपं विभावयेत् इति ततो देव्यास्तामादाय
घटसमीपे गुरुपात्रं ततः शक्तिपात्रं भोगपात्रं स्वपात्रं योगिनीपात्रं वीरपात्रं

वलिपात्रं पाद्यपात्रं अर्घ्यपात्रं आचमनीयपात्रं मधुपर्कपात्रं संस्थाप्य चर्वणायु
तकारणेनतत्त्वमुद्रया श्रीपादाद्धिंहृत्समुद्भूतम् आनंदभैरवं तर्पयामिनमः इतित
न्मंत्रेणत्रिःसंतर्प्य ततः गुरुं श्रीमच्छ्रीअमृतकानंदनाथश्रीपादुकां तर्पयामिनमः
इतित्रिःसंतर्प्य एवं परमगुरुपरमाचार्यादीन्संतर्प्य श्रीपादाम्वृतेनमूलेनदेवी
सायुधांसवाहनांसपरिकरां तर्पयामिनमः इतिसंतर्पयेत् इतिकलशपूजा॥
विधिः अथपीठोपरिपूर्ववत्पीठन्यासक्रमेणपीठपूजांकृत्वा तत्रश्रीचक्रं।
संस्थाप्य श्रीशारिकाभगवतीं ध्यात्वा वायुवीजेनवामनासापुटेनस्वहृदया।
त्कुसुमांजलिमानीय तत्रावाह्य देवेशिभक्तसुलभेपरिवारसमन्विते यावा।
त्वांपूजयिष्यामितावद्देविइहावह इतिपठित्वा मूलं श्रीवामदेवसहिते श्रीशा
रिकाभगवति इहागच्छ २ इहतिष्ठ २ इहसन्निधेहि २ इहसन्निरुद्धस्व ममा।

शा०
पू०
२६

सर्वोपचारसहितां एनां गृह्णी २ इत्यावाहनादिमुद्राः प्रदर्श्य प्राणप्रतिष्ठां श्रीच
क्रे लेलिहानमुद्रया एवं विदित्वाय दशदिग्बंधं कृत्वा ऽ वगुंठ्य सकलीकृत्य परमी
कृत्य धेनुयोनीप्रदर्श्य वराभयचक्राभयमुद्राः प्रदर्श्य श्रीपाद्यामृतेन मायुर्थां सवा
हनां सपरिकरां सावरणां श्रीवामदेवभैरवसहितां श्रीशारिकाभगवतीं तर्पया
मि नमः इति त्रिःसंतर्प्य पुनरपि मूलेन श्रीशारिकाभगवतीं श्रीपादुकां तर्पया
मि नमः इति त्रिःसंतर्प्य मूलमुच्चार्य एतत्पाद्यं श्रीवामदेवसहित श्रीशारिका
भगवत्यै नमः इति पादयोः पाद्यं एवमर्घ्यं स्वाहा शिरसि आचमनीयं मधुपर्कं
वसथा मुखे स्नानीयं नमः सर्वांगे पादुके परियाय स्व शारिके रत्ननिर्मिते
स्नानमंडपमायाहि स्नानार्थं शक्रदिग्गतं मूलेन स्व स्नाप्य पुनः पुनः पादु
के परियाय स्व शारिके रत्ननिर्मिते आगच्छ निर्मितं रम्यमलंकारस्य मंडपम्

सुहृदुकूलेनांगंप्रोञ्छ्य विचित्रपट्टवस्त्रकुंकुमकस्तूरीचंदनसिंदूरमुकुटकुंड
लहारत्नयादिनानालंकारान्दत्वा पुनराचमनीयंदद्यात् ततोमध्यानामांगुष्ठा
ग्रैर्गंधोनमः इतिगंधं अंगुष्ठतर्जनीभ्यांपुष्पाणिवौषट् इतिपुष्पंसंपूज्य धूपा
पात्रंफट्इतिसंपूज्य पुरतःस्थापयित्वा वामतर्जन्यासंस्पृशन् श्रीपादामृतेनधू
पंनिवेदयामीतितिनिवेद्य ॐजगद्धुनिमंत्रमातःस्वाहा इतिघंटांसंपूज्य वामेनपा
णिनातांवादयन् मध्यानामांगुष्ठैर्धूपंधृत्वा गायत्रीमूलमंत्रंचपठन् वनस्पति
रसोत्पन्नोगंधाढ्योगंधउत्तमः आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यतां इतित्रिधो
तोल्पदेवींधूपयेत् ततोदीपंसंमुखेसंस्थाप्य एवंवत्प्रोक्षणपूजनेकृत्वा वा
ममध्यमयादीपपात्रंस्पृशन् दीपंनिवेदयामीतितिनिवेद्य एवंवद्घंटांवादयन्
मध्यानामामध्येदीपपात्रंमंगुष्ठेनधृत्वादर्शयन् गायत्रीमूलंचपठन् स्वप्रका

श्रा. सू. ५२

ष्टोमहादीपः सर्वत्रतिमिरापहः सबाह्याभ्यंतरंज्योतिर्दीपोयंप्रतिगृह्यतां इति
दीपयेत् ततःस्वर्णादिपात्रे कुंकुमेनवसुपत्रंचंद्ररूपंकृत्वा मध्येदीपमेकमष्ट
पत्रेषुदीपाष्टकंसंस्थाप्य स्त्रीं सौः ह्स्रूं ह्स्लूं ह्स्रूं ह्स्रूं ह्स्रीं रत्नेश्वर्यैनमः इत्यभ्यर्च्य
मूलेनचाभ्यर्च्य स्थालकंमस्तकांतमुद्धृत्य नववारंमूलं समस्तचक्रचक्रेशी
युतेदेविनवात्मके आरात्रिकमिदंदेविगृहाणममसिद्धये इतिचक्रमुद्रयानी
राजयेत् ततोनानानैवेद्यंस्वर्णादिपात्रेनिक्षिप्य ह्रुमित्यवगुंठ्य धेनुमुद्रया
मृतीकृत्य मूलंसप्तधाजप्त्वा वामांगुष्ठेननैवेद्यपात्रंस्पृशन् मूलांते हेमपा
त्रगतंदिव्यंपरमान्नंसुसंस्कृतं पंचधाषड्रसोपेतंगृहाणपरमेश्वरि नैवेद्यं।
निवेदयामीतिदत्त्वानामांगुष्ठाभ्यांमुद्रांत्यजेत् ततःपुनराचमनीयंदत्त्वा मूलां
तेकर्पूरादियुक्तंतांबूलंनिवेदयामीतिएवंवह्नेद्यात् सर्वेषामर्घ्यपात्रजले।

नोत्सर्गः कार्यः ततस्तत्र मुद्रया देवीं त्रिः संतर्प्य पूर्वोक्तमुद्राः प्रदर्श्य योनिं हृदि क्षोभिणीं मुखे द्राविणीं भ्रूमध्ये आकर्षिणीं ललाटे वशिनीं ब्रह्मरंध्रे आह्लादिनीं पंचमुद्रामयीं प्रदर्श्य कृतांजलिः श्रीशारिका भगवति आवरणं ते पूजयामि इत्याज्ञां गृहीत्वा आवरणपूजामारभेत् तत्रादौ चतुर्द्वारपूजां कुर्यात् ॐ ह्रीं श्रीं गां गणपति श्रीपादुकां पूजयामि नमस्तर्पयामि नमः ॐ ह्रीं श्रीं यं यमराज श्रीपादुकां पूजयामि नमस्तर्पयामि नमः ॐ ह्रीं श्रीं वं वरुण श्रीपादुकां पूजयामि नमस्तर्पयामि नमः ॐ ह्रीं श्रीं कुं कुवेर श्रीपादुकां पूजयामि नमस्तर्पयामि नमः इति चतुर्द्वार प्रथमरेखायां पूर्वादिक्रमेण पूजयेत् इति प्रथमावरणम् ततो द्वितीयरेखायां इंद्रादीन् पूजयेद्यथा ॐ ह्रीं श्रीं इंद्र श्रीपादुकां पूजयामि नमस्तर्पयामि नमः ॐ ह्रीं श्रीं अग्नि श्रीपादुकां पूजयामि नमस्तर्पयामि नमः ॐ ह्रीं श्रीं यम श्रीपा।

धा. डुकां पूजयामि नमस्तर्पयामि नमः ॐ ह्रीं श्रीं निऋति श्रीपादुकां पूजयामि नमस्त
पू. र्पयामि नमः ॐ ह्रीं श्रीं वरुण श्रीपादुकां पूजयामि नमस्तर्पयामि नमः ॐ ह्रीं श्रीं
२८ वायु श्रीपादुकां पूजयामि नमस्तर्पयामि नमः ॐ ह्रीं श्रीं कुबेर श्रीपादुकां पूजया
मि नमस्तर्पयामि नमः ॐ ह्रीं श्रीं ईशान श्रीपादुकां पूजयामि नमस्तर्पयामि नमः इ
न्द्रीशानयोर्मध्ये ॐ ह्रीं श्रीं ब्रह्म श्रीपादुकां पूजयामि नमस्तर्पयामि नमः निऋतिवरु
णयोर्मध्ये ॐ ह्रीं श्रीं विष्णु श्रीपादुकां पूजयामि नमस्तर्पयामि नमः इति चतुरस्रद्वि
तीयरेखायां संपूज्य तृतीयरेखायामेतेषामायुधानि पूजयेद्यथा ॐ ह्रीं श्रीं वज्र श्री
पादुकां पूजयामि नमस्तर्पयामि नमः ॐ ह्रीं श्रीं दंड श्रीपादुकां पूजयामि नमस्तर्प
यामि नमः ॐ ह्रीं श्रीं खड्ग श्रीपादुकां पूजयामि नमस्तर्पयामि नमः ॐ ह्रीं श्रीं पाश श्री
पादुकां पूजयामि नमस्तर्पयामि नमः ॐ ह्रीं श्रीं पद्म श्रीपादुकां पूजयामि नमस्तर्प

यामिनमः ॐ ह्रीं श्रीं चक्रश्रीपादुकांपूजयामिनमस्तर्पयामिनमः ॐ ह्रीं श्रीं
ध्वजश्रीपादुकांपूजयामिनमस्तर्पयामिनमः ॐ ह्रीं श्रीं गदाश्रीपादुकांपूजया
मिनमस्तर्पयामिनमः ॐ ह्रीं श्रीं त्रिशूलश्रीपादुकांपूजयामिनमस्तर्पयामिनमः
इतितृतीयरेखायांसंपूज्य इतिद्वितीयावरणम् अथत्रिकोणपूजा तत्रादौप्रथम
रेखायां मूले ॐ ह्रीं श्रीं ऐंदिव्यौघपराख्यगुरुपंक्तिश्रीपादुकांपूजयामिनमस्त
र्पयामिनमः द्वितीयरेखायां मूले ऐंसिद्धौघपरापराख्यगुरुपंक्तिंश्रीपादुकांपू।
जयामिनमस्तर्पयामिनमः तृतीयरेखायां मूले ऐंमानवौघाऽपराख्यगुरुपंक्ति।
श्रीपादुकांपूजयामिनमस्तर्पयामिनमः अत्रैव ॐ ह्रीं श्रीं स्वगुरुश्रीपादुकांपूजया
मिनमस्तर्पयामिनमः ॐ ह्रीं श्रीं परमगुरुश्रीपादुकांपूजयामिनमस्तर्पयामिन
मः ॐ ह्रीं श्रीं परमाचार्यगुरुश्रीपादुकांपूजयामिनमस्तर्पयामिनमः ॐ ह्रीं श्रीं

परमेष्टिगुरुश्रीपादुकांपूजयामिनमः तर्पयामिनमः इतितृतीयरेखायांतृतीयावर
णम् ततोष्टदलेषुमूलेनपुष्पांजलिंदत्वा अष्टमातृकाःपूजयेद्यथा स्वाग्रदलमार
भ्यवामावर्तेन ओंह्रींश्रींब्राह्मीश्रीपादुकांपूजयामिनमस्तर्पयामिनमः ओंह्रींश्रीं
वैष्णवीश्रीपादुकांपूजयामिनमस्तर्पयामिनमः ओंह्रींश्रींचंडिकाश्रीपादुकांपू।
जयामिनमस्तर्पयामिनमः ओंह्रींश्रींअपराजिताश्रीपादुकांपूजयामिनमस्तर्पया
मिनमः ओंह्रींश्रींकौमारीश्रीपादुकांपूजयामिनमस्तर्पयामिनमः ओंह्रींश्रींशांभ
वीश्रीपादुकांपूजयामिनमस्तर्पयामिनमः ओंह्रींश्रींवाराहीश्रीपादुकांपूजयामि
नमस्तर्पयामिनमः ओंह्रींश्रींनारसिंहीश्रीपादुकांपूजयामिनमस्तर्पयामिनमः
इतिसंपूज्यसंतर्प्याष्टदलकेसरेषुदक्षावर्तेनाष्टदलभैरवान्पूजयेत् ओंह्रींश्रींअ
सितांगभैरवश्रीपादुकांपूजयामिनमस्तर्पयामिनमः ओंह्रींश्रींरुरुभैरवश्रीपादु।

कां पूजयामि नमस्तर्पयामि नमः ॐ ह्रीं श्रीं चंडभैरव श्री पादुकां पूजयामि नम
स्तर्पयामि नमः ॐ ह्रीं श्रीं क्रोधभैरव श्री पादुकां पूजयामि नमस्तर्पयामि नमः
ॐ ह्रीं श्रीं उन्मत्तभैरव श्री पादुकां पूजयामि नमस्तर्पयामि नमः ॐ ह्रीं श्रीं कालभैरव
श्री पादुकां पूजयामि नमस्तर्पयामि नमः ॐ ह्रीं श्रीं भीषणभैरव श्री पादुकां पूजयामि
नमस्तर्पयामि नमः ॐ ह्रीं श्रीं संहारभैरव श्री पादुकां पूजयामि नमस्तर्पयामि नमः
इति वसुथावरणं अथाष्टकोणपूजा तत्रादौ मूलेन पुष्पांजलिं दत्वा ॐ ह्रीं श्रीं असिता
श्री पादुकां पूजयामि नमस्तर्पयामि नमः ॐ ह्रीं श्रीं कामा श्री पादुकां पूजयामि नम
स्तर्पयामि नमः ॐ ह्रीं श्रीं चार्वांगी श्री पादुकां पूजयामि नमस्तर्पयामि नमः ॐ ह्रीं
श्रीं टंकधारिणी श्री पादुकां पूजयामि नमस्तर्पयामि नमः ॐ ह्रीं श्रीं तारा श्री पादु
कां पूजयामि नमस्तर्पयामि नमः ॐ पार्वती श्री पादुकां पूजयामि नमस्तर्पयामि नम :

ह्रीं श्रीं

शा॰ ॐ ह्रीं श्रीं यक्षिण्यै श्रीपादुकां पूजयामि नमस्तर्पयामि नमः ॐ ह्रीं श्रीं शिवायै श्रीपादु
पू॰ कां पूजयामि नमस्तर्पयामि नमः इति वस्त्रकोणेषु तत्र त्रिकोणाग्रकोणमारभ्य ॐ
३० ह्रीं श्रीं कालिकायै श्रीपादुकां पूजयामि नमस्तर्पयामि नमः ईशाने ॐ ह्रीं श्रीं त्रिपुर
सुंदरी श्रीपादुकां पूजयामि नमस्तर्पयामि नमः आग्नेये ॐ ह्रीं श्रीं दुर्गायै श्रीपादु।
कां पूजयामि नमस्तर्पयामि नमः इति त्रिकोणपूजा षष्ठावरणम् ततो बिंदौ मूले
न पुष्पांजलिं दत्वा तत्र श्रीदेवीं ध्यात्वा पुष्पांजलिं गृहीत्वा मूलं समुच्चार्य श्री
मच्छ्रीवामदेवसहितां सपरिवारां सायुधां सवाहनां श्रीशारिकां भगवतीं श्री।
पादुकां पूजयामि नमस्तर्पयामि नमः इति संपूज्य संतर्प्य पुनः एवं वह्न्यादिना
संपूज्य संतर्प्य अथ हवनविधिः तीर्थे स्नेयं तीर्थमेव समानानां भवति मानः
शंसो अररुषो धूर्तिः प्रणङ्मर्त्यस्य रक्षाणो ब्रह्मणस्पते वसोः पवित्रमसि शत

धारं वसूनां सहस्रधारं मयह्मावः प्रजया संसृजामि रायस्पोषेण वहुला भवंति इति हस्तपादादि पंचस्नानी मंत्रः परमात्मने पंचवक्त्रात्मने मंत्रनाथाय याथारशान्तेय स्वात्मने शिवशक्तिस्वरूपाय गंधो नमः अर्घ्यो नमः धूपो नमः स्वप्रकाशो महादीपः स वैनस्तिमिरापहः सवाह्याभ्यंतरं ज्योतिर्दीपोयं प्रतिगृह्यतां वनस्पतिरसोत्पन्नो गंधाढ्यो गंधउत्तमः आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यतां नमो यर्मनियानाय नमः स्वच्छन्दस्यां तिए नमः प्रत्यक्षदेवाय भास्कराय नमो नमः यत्रास्ति माता न पिता न वंधुर्भ्राता पिनो यत्र सुहृज्जनश्च न ज्ञायते यत्र दिनं न रात्रिस्तत्रापि दीपं शरणं प्रपद्ये ॐ नत्सत् अद्य मासोत्तमे मासे अमुकपक्षे तिथावमुकायां आत्मनः वाङ्मनःकायोपार्जितपापनिवारणार्थं अमुकगोत्रः अमुकशर्माहं श्रीमदिष्टदेवीमंत्रसिद्ध्यर्थं कृतनित्यनैमित्तिकः साधकः होमसमाचरेत् तद्यथा स्वाग्रे त्रिकोणं ऊंडं निवध्य ॐ ह्रीं विघ्नोत्सारिण्यै नमः

पा. रं रं वैश्वानराय नमः मूलं भुवादिभ्यो हुं फट् स्वाहा इतिनैनन्दत्वाग्रेगारंक्षिप्य ॐ ह्रीं रं
सू. सः वैश्वानर लोहिताक्ष त्रिनेत्र इहागच्छ ज्वालामुख इह संनिधेहि इह सन्निरुध्यस्व इह
३१ संमुखीभव ह्रीं रं सः स्वाहा मूलं आज्यं तेजः समुद्दिष्टं आज्यं पापहरं परं आज्यं सुराणा
माहारः आज्ये लोकः प्रतिष्ठितः दिव्यन्तरिक्षभूमौ नायत्ते किल्बिषमागतं तत्सर्वमाज्य
दर्शनविनाशमुपगच्छतु तत्सत् अद्येति श्रीशारिकाभगवतीप्रस्मरणसिद्धये प्र
स्मरणांगभूतं होमं अमुककामनासिद्धये इदमाज्यं मर्पयामि स्वाहा इत्याज्यवीक्षणं कृ
त्वा प्राणाहुतीर्दत्वा प्राणाय स्वाहा अपानाय स्वाहा समानाय स्वाहा उदानाय स्वाहा
व्यानाय स्वाहा षडंगाहुतीर्दद्यात् ॐ ह्रां श्रां हृदयाय नमः स्वाहा ॐ ह्रीं श्रीं शिरसे स्वाहा
स्वाहा ॐ ह्रूं श्रूं शिखायै वषट् स्वाहा ॐ ह्रैं श्रैं कवचाय हुं स्वाहा ॐ ह्रौं श्रौं नेत्रत्रयाय वौषट्
स्वाहा ॐ ह्रः श्रः अस्त्राय फट् स्वाहा ततः दक्षकरेण हुतवस्तु इहोत्वा वामेन मालामा

दायज्ञेनेत् मूलं न्यूनातिरिक्तमंत्रचक्रतत्त्वमिरस्तुस्वाहा गुह्यातितर्पणं मूलं शि
वमस्तुयजमानस्यच्छिद्रंमाभूत्कदाचन देवदेव्याप्रसादेनरत्तरत्तास्तुमेस्पृशं अग्ने
नमंत्रहोमेनश्रीशारिकाभगवतीसांगासासनासपरिवारासालंकारासायुधाप्रीता
मेभवतुस्वाहा ईशानेभस्मसंस्पृश्य जलमितिभस्म स्थलमितिभस्म अग्निमितिभस्म
इतिमंत्रतिलकंकृत्वा ॐमूलंफट्विमुंचामि फट्परिमोक्ष्यामि फट्परिविसृजामि
मूलेनाग्नौपुष्पांजलिंदत्वा विसृजाग्निंतर्पयेत् कर्पूररक्तचंदनमिश्रितनायैततः
मार्जयेत्यजमानशीर्षैः ततःब्राह्मणभुक्तिः इतिहोमविधिः ईशानेमंडलंकृत्वा
वटुकायनमः एह्येहिदेवीपुत्रवटुकनाथकपिलजटाभारभास्वरत्रिनेत्रज्वालामु
खसर्वविघ्नान्नाशय २ सर्वोपचारसहितंबलिंगृह्णस्वाहा आग्नेये यांयोगिनीभ्यो
नमः ऊर्ध्वब्रह्मांडतोवादिविगगनतलेभूतलेनिष्कलेवा पातालेवानलेवासलिल

श्या. पवनयोर्मध्ये त्रकूत्रस्थितावा क्षेत्रेपीठोपपीठादिषु वकृतपदास्पदीपादिकेन प्रीणादे
सू. व्याः सदानः शुभवलिविधिना पान्तु वीरेन्द्रवंद्याः यां योगिनीभ्यः स्वाहा सर्वयोगिनीहुं
३२ फट् स्वाहा इति योगिनीवलिः नैऋत्ये क्षां क्षीं क्षूं क्षैं क्षौं क्षः क्षेत्रपाल प्रलिवलिपिशितस
हितं वलिं गृह्ण २ स्वाहा इति क्षेत्रपालवलिः वायव्ये गां गीं गणपतये वरवरद सर्वजनं मे
वशमानय २ वलिं गृह्ण २ स्वाहा इति गणपतिवलिः उत्तरे सर्वभूतेभ्यो नमः ॐ ह्रीं स
र्वविघ्नकृद्भ्यः सर्वभूतेभ्यो पत्नीसहितेभ्यो हुं फट् स्वाहा सर्वभूतेभ्य एष वलिर्नमः इति
सर्वांगुलिभिः वलिमुत्सृजेत् इति भूतवलिः अशक्त एकपात्रे एष वलिं पंचको दद्यात्
अस्मिन्नेवावसरे छागादिवलिं दद्यात् तत्र पशुं मूलेन संस्थाप्य गंधास्रगादिभिरलंकृ
त्य देव्यग्रे संस्थाप्य मूलेन प्रोक्षणेजलेन प्रोक्ष्य अस्त्रेण संरक्ष्य कवचेनावगुंठ्य मूलेन धे
नुमुद्रयाऽमृतीकृत्य ॐ पं ह्रीं श्रीं सर्वदेवतारूपिणे वलिरूपायाऽमुकपशवे नमः इति

32

गंधादिनाभ्यर्च्य संपूज्य तस्य दक्षकर्णे गायत्रीं पशुपाशाय विद्महे विश्वकर्मणे धीमहि
तन्नो जीवः प्रचोदयात् ३ इति पशुगायत्रीं पुरतः खड्गं निधाय ओं ह्रीं कालि कालि वज्रे
श्वरि लोहदंडायै नमः इति गंधादिनाभ्यर्च्य तन्मूले ओं वागीश्वरी ब्रह्मभ्यां नमः
मध्ये ओं लक्ष्मीनारायणाभ्यां नमः अग्रे ओं उमामहेश्वराभ्यां नमः इति संपूज्य तं खड्गं
त्वामंत्रयेत् खड्गाय खरनाशाय देवकार्यार्थतत्परः पशुच्छेद्यस्त्वया शीघ्रं खड्गनाथ न
मोस्तु ते इत्यभिमंत्र्य गंधाक्षतजलादिकमादाय ओं अमुककामः श्रीशारिका भगवति
इमं पशुं तुभ्यमर्पयाम्यहं सा प्रसीद इति पठित्वा पशोः शिरसि निक्षिप्य तच्छिरः स्पृष्ट्वा
यज्ञार्थं पशवः सृष्टा यज्ञार्थं पशुघातनं अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधोऽवधः शि
वाय नमिदं पिंडमतस्त्वं शिवतां गतः उद्बुध्यस्व पशो त्वं हि नाशिवस्त्वं शिवोसि हि इति
संबोधयित्वा खड्गमादाय सौः अस्त्राय फट् छिंधि छिंधि स्वाहा इति खड्गं तस्य स्कंधे दद्यात्

श्या. पू. ३१ जयेत् ततः स्वयंदेवीरूपोभूत्वा निर्विकल्पचकेन प्रहारेण छिंद्यात् इति वलिंद
त्वाऽस्त्रंदेव्यैदत्वावटुकादिभ्योपिदत्वा श्रीदेवीस्वप्रसन्नांविभाव्य पशुशिरोदक्षे
संस्थाप्य तस्मिन् घृतकृतदशांप्रज्वलंतीं संस्थाप्य तत्रदेवींध्यात्वा स्वप्रसन्नांविभा
वयेदितिवलिदानविधिः ततःप्राणायामऋष्यादिकरषडंगन्यासानंतरंगुरुदेव्यौ
ध्यायन् फ्रांॐश्रींक्रूंश्रांशांशारिकायैनमः ह्रीं इत्युत्कीलनं १ ह्रूंॐश्रींफ्रांश्रांशांशा
रिकायैनमःह्रीं इतिसंजीवनं १ शंमूलंसंसंहूंलंवंः इतिमौटिल्प १ ॐफ्रांदेविशा
रिकेब्रह्मशापंमोचय २ स्वाहा इतिशापहरीदशधाजपेत् ॐह्रींश्रींह्रूंश्रांशांशा
रिकायैनमःफ्रां इतिमंत्रस्टमंत्रः ॐवंवामदेवंजपेत् १ मालेमालेमहामायेसर्वे
शक्तिस्वरूपिणि चतुर्वर्गस्त्वयिन्यस्तस्तस्मान्मेसिद्धिदाभव इतिपठन्मालावामह
स्तेकृत्वा सामान्यार्घ्योदकेनाभ्युक्ष्य मूलेनसंपूज्य शिरसिगुरुंहृदयेदेवींकंठेपी

33

तर्वर्णो मूलविद्यां ध्यायन् दक्षहस्तेन मालां गृहीत्वा यथाशक्ति जपं कुर्यात् ततः
त्वं माले सर्वदेवानां प्रीतिदा शुभदा भव शुभं कुरुष्व मे भद्रे यशो वीर्यं च सर्वदा इति
पठन् मालां शिरसि धृत्वा पुनरपि प्राणायाम ऋष्यादि करषडंगन्यासानंतरं सा
मान्यार्घ्योदकेन चुलकं गृहीत्वा गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपं सि
द्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि इत्यनेन तेजोमयं जपफलं देवीवामहस्ते स
मर्प्य मालां मूलेन संपूज्य स्वस्थाने संस्थाप्य कवचसहस्रनामस्तवराजपाठं वि
यायाष्टांगं प्रणिपत्य सर्वमंगलमंगल्ये शिवे सर्वार्थसाधके शरण्ये त्र्यंबके गौरि
नारायणि नमोऽस्तु ते इति सप्तवारं पठन् सप्तधा देवीं पुष्पैः पूजयेत् पुनः पुनर्नत्वा
प्रदक्षिणीकृत्य देवनाथगुरोः स्वामिदेशिक स्वात्मनायक त्राहि त्राहि कृपासिं
धो पूजां पूर्णतरां कुरु सामयिकैः सह मंडलं वंदनं कुर्यात् यथा तत्रादौ गुरुपात्रं।

शा॰ मुहूर्त्तं गुरुमंत्रंस्मरन् यदिगुरुस्तत्रैवस्यात्तस्मैदद्यात् यदिनस्यात्तज्ज्येष्ठशि
प॰ ष्यायदद्यात् तदभावेस्वशिरसिस्थापयेत् ततःस्वपात्रंगृहीत्वा कुंडलिनीस्वाग्नि
३४ ह्वाग्रमानीय सामयिकेभ्योजुहोमीत्युक्त्वा तेभ्योजुषध्वंजुषतां यथोचितांशंगृही
34 त्वा पात्रवंदनंकुर्याद्यथा श्रीमद्भैरवशेखरप्रविलसच्चंद्रामृताप्लावितं क्षेत्राधी
श्वरयोगिनीगणमहासिद्धैःसमाराधितं आनंदार्णवकंमहात्मकमिदंसाक्षात्त्रि
खंडामृतं वंदेश्रीप्रथमंकरांबुजगतंपात्रंविशुद्धिप्रदं १ इदंपवित्रममृतंपिबामिभ
वभेषजं पशुपाशसमुच्छेदकारणंभैरवोदितं आर्द्रंज्वलतिज्योतिरहमस्मिज्योति
र्ज्वलतिब्रह्माहमस्मि अहमस्मिब्रह्माहमस्मियोहमस्मिब्रह्माहमस्मि सोहम।
स्मिब्रह्माहमस्मिअहमेवाहंमांजुहोमिस्वाहा इत्युक्त्वाप्रथमंपात्रंकुंडलिनीमु
खेजुहुयात् आत्मतत्वंशोधयामिस्वाहा हैमंसिंधुरसावहंदयितयादत्तंचपे

यादिभिः किंचिच्चंचलरक्तपंकजरुचा सानंदमद्दीक्षितं वामेस्याद्विष्णुहस्त
द्विशाकलपाणौ विधायास्वके वंदे पात्रमहं द्वितीयमधुना नंदैकसंवर्धनं श्रीमै
मैत्ररपि २ विद्यातत्त्वं शोधयामि स्वाहा सर्वाम्नायकलाकलापकलितं कौतूह
लोद्योतनं वंद्यं पेयमहं हृदंशं भव वरुण ब्रह्मादिभिः सेवितं ध्यातं देवगणैः परं मुनि
गणैर्मोक्षार्थिभिः सर्वदा वंदे पात्रमहं तृतीयमधुना स्वात्मावबोधप्रदम् ३ शिवत
त्त्वं शोधयामि स्वाहा मद्यं मीनरसावहं हरिहरब्रह्मादिभिः पूजितं मुद्रामैथुन
धर्मकर्मनिरतं तारागज्ञानिकाःश्रयं आचार्याष्टकसिद्धभैरवकलाधीशेन संशो
धितं पायात्पंचमकारतत्त्वसहितं पात्रं चतुर्थं त्वमः भैरवतत्त्वं शोधयामि स्वाहा ४
आधारे भुजगाधिराजवलये पात्रं महीमंडले द्वीपं सप्तसमुद्रवारिपिशितं चाष्टौ
च दिग्दंतिनः सोहं भैरवमर्चयन् प्रतिदिनं तारागणै रक्षितैः नादिसप्रसुखैः स्वरास्वर

प्रा. गणैराज्ञाकारैः किंकरैः विधातत्वं शोधयामि स्वाहा ५ ॐ ऐं चामरभद्रपीठपरमा
पू. नंदोदयादायकं वाजीदंतिमनोहरं सुखकरं साम्राज्यसाम्राज्यदं नानाव्याधिभवाय
३५ कारहरणं जन्मांतरध्वंसनं श्रीमद्भैरवभैरवीप्रियतरं पात्रं च वषट् हुं नमः ६ कुलतत्वं
शोधयामि स्वाहा जाग्रत्स्वप्नसुषुप्तिबोधपवनं चैतन्यसाक्ष्यप्रदं विद्युद्भास्करचंद्र
जिह्वयज्ञधाम्नोतिष्ठकलाव्यापितं येडापिंगलमध्यगात्रिवलया तस्याः प्रबोधोद्ध
तं पात्रं सम्मसमुद्ररत्नतरुणानंदप्रदं पातु मां मूलतत्वं शोधयामि स्वाहा ७ ऐं
ॐ श्रीगुरुपादुकां च तिलकं कंठे पिमारस्तनं शत्रोर्वाग्बलबुद्धिशौर्यहरणं देह
स्थितेः कारणं वांछासिद्धिकरं मनःस्थितिकरं वश्यं जगद्योषितां पात्रं चाष्टमम
ष्टसिद्धिकरणं वेदेश्वजापालयं शिवतत्वं शोधयामि स्वाहा ८ सर्वानंदकरं सदाशि
वपदं सर्वार्थसंपत्प्रदं साम्राज्यार्थकरं समस्तसुखदं वात्तानविध्वंसनं आग्रंका

त्तियशोविवर्धनकरं संसारमोहच्छिदं पात्रं लक्ष्यगुणात्मकं च नवमं श्रीफप्रतां प
भजे देवीतत्त्वशोधयामि स्वाहा ९ ब्रह्मविष्णुमहेशानां देवानां च विशेषतः उल्लेभ
पावनं पात्रं दशमं प्रणमाम्यहं सर्वतत्त्वशोधयामि स्वाहा १० पापघ्नं शांतिसुखदं दिव्य
स्वादुसुखालयं पात्रमेकादशं वंदे गुरुसेवासुखागतं ११ पात्रं कृत्वा करे मंत्री सर्वकर्म
लभेत्सदा इहलोके श्रियं भुक्त्वा देहांते भैरवो भवेत् १२ देहस्थाखिलदेवता गजमुखाः
क्षेत्राधिपा भैरवा योगिन्यो वटुकाश्च सिद्धपितरः पैशाचकाश्चेटकाः अन्ये भूचरखेचराः
प्रतिपदं वेतालभूतग्रहाः तृप्तास्तुः कुलपात्रकस्य पिबतः श्रीवीरसंतर्पणात् १३
वामे रामारमणकुशलाद्दक्षिणे चालिपात्रम् अग्रे मुद्रा चणकवटुकाः सूकरस्योष्ण
शुद्धिः स्कंदे वीणा सरसकविता सत्कथा सद्गुरूणां कौलो मार्गः परमगहनो योगि
नामप्यगम्यः १४ अलिपिशितपुरंध्रीभोगपूजापरोहं बहुविधकुलमार्गारंभसं

श्या. भावितोऽहं पशुजनविमुखोऽहं भैरवीमाश्रितोऽहं गुरुचरणरतोऽहं भैरवोऽहं शिवोऽहं
प्र. करेपात्रं सुखे स्तोत्रमानंदोल्लसदयांबुजे मूर्ध्नि श्रीगुरुपादाब्जस्मरणं किमतःपरं १६
२८ एकेन शुष्कवट्केन चषकं पिबामि वा पीपिबामि सहस्रालवणार्द्रकेण आस्वाद्यमा
36 समलिरोहितखंडखंडगंगां पिबामि यमुनां सहस्रागरेण १७ वामे चंद्रमुखी मुखे
च मदिरापात्रकरांभोरुहे मूर्ध्नि श्रीगुरुचिंतनं भगवती ध्यानास्पदं मानसं जिह्वा
यां जपसाधनं परिणतिः कौलक्रमाभ्यासने ये संतो नियतं पिबंति सरसं ते शुक्तिसु
मीगताः १८ पीत्वा पीत्वा पुनः पीत्वा यावत्पतति भूतले उत्थाय च पुनः पीत्वा पुनर्ज
न्म न विद्यते १९ यमीयमहं विदीमे स्वात्माग्नौ मनसा स्रुचा स्वशुष्मणा वन्मिनानिश
मतहनीर्जुहोम्यहं २० प्रकाशाकाशहस्ताभ्यामवलंब्योन्मनीस्रुचं यमीयमिक
लास्नेहं प्राणवह्नौ जुहोम्यहं २१ यावन्न चलते दृष्टिर्यावन्न चलते मनः तावत्पानं।

प्रकर्तव्यं पशुपानमतःपरं एवं पात्रवंदनं कृत्वा ततः स्थापितबलिपात्रस्थापि
तमन्नादिकमेकस्मिन्पात्रे कृत्वा सोदकपात्रहस्तः एकाग्रहृदो हस्तिर्गत्वा जलेन शुचौ
देशे चतुरस्रकृत त्रिकोणात्मकं मंडलं कृत्वा चेति एवं वदन् तत्र गदादिडमरुपात्रहस्ता।
स्तं त्रिलोचनं कृष्णाभं भैरवं देवं सर्वविघ्नविनाशनं वामाधःकरमारभ्य वामोर्ध्वकर
पर्यंतमायुधध्यानं इत्थमुच्छिष्टभैरवं ध्यात्वा गंधादिभिः संपूज्य ॐ ऐं ह्रीं श्रीं उच्छिष्ट
भैरव एह्येहि बलिं गृह्ण गृह्ण हुं फट् स्वाहा इति मंत्रेण तस्मिन्मंडले पात्रस्थं बलिद्रव्यं
विसृज्य तत्पात्रे हस्तौ पादौ च प्रक्षाल्य आचम्य तत्पात्रं जलेन प्रपूर्य एकाग्रहृद्गृहं गत्वा
उदयोऽस्त्विति वदन् अंतः प्रविश्य स्वासने हृष्टं उपविश्य तत्पात्रस्थजले विशेषार्घ्यजल।
बिंदुं दत्वा तेन जलेन स्वात्मानमभिषिंचन् शांतिस्तोत्रं पठेत् श्रीवामकेश्वरतंत्रे न
ष्टं तु प्रेतकृष्णांज्ञानपुण्यंतु हूषकानराः साधकानां शिवाः संतु आम्नायपरिपालिनां ।

प्रां. जयंतुमातरःसर्वाजयंतुयोगिनीगणाः जयंतुसिद्धडाकिन्योजयंतुगुरुपंक्तयः २
पृ. नंदंतुअणिमासिद्धानंदंतुभैरवादयः नंदंतुदेवताःसर्वाःसिद्धविद्याधरादयः ३
१० येचाम्नायविशुद्धाश्चमंत्रिणःशुद्धबुद्धयः सर्वदानंदहृदयानंदंतुममभक्तितः ४
नक्षत्राणिग्रहायोगाःकरणाश्चतथापरे सर्वेतेसुखिनोयांतुमासाश्चतिथयास्तथा ५
तृप्यंतुपितरःसर्वेऋतवोवत्सरादयः भूचराःखेचराश्चैवतृप्यंतुममभक्तितः ६
अंतरिक्षचरायेचयेचान्येदेवयोनयः सर्वेतेसुखिनोयांतुसर्वानद्याश्चपत्रिणः ७ पशु
वस्तरवश्चैवपर्वताःकंदराःगुहाः ऋषयोब्राह्मणाःसर्वेशांतिंकुर्वंतुमेसदा ८ तीर्था
निपशवोगावोयेचान्येपुण्यभूमयः रुद्राःपतिव्रतानार्यःशिवंकुर्वंतुमेसदा ९ शिवंसर्व
त्रमेवास्तुपुत्रदारधनादिषु राजानःसुखिनःसंतुतेनममार्गोस्तुमेसदा १० शुभामेदिवसा
यांतुमित्रास्तिष्ठंतुमेशिवाः सायकाजयिनःसंतुशिवाःनिष्ठंतुशूजकाः ११ द्वेष्टारःसाध्य।

३

कानांचसदेवाश्नायहृष्टकाः डाकिनीनांसुखेयांतुसर्वास्ताभिशांतेस्तुताः १२ शत्रवो
नाशमायांतुममनिंदाकराश्चये द्वेष्टारःसाधकानांचविनश्यंतुशिवाज्ञया १३ येनिंद
कास्तेविलयंप्रयांतुयेसाधकास्तेप्रभवंतुसिद्धाः सर्वत्रदेवीकरुणावलोकाद्गुरुःपरे
शीममसन्निधत्तां १४ इतिशांतिस्तोत्रं अथान्यप्रकारेण श्रीभैरवउवाच देविवक्ष्यामि
रत्नांतेशांतिस्तोत्रमनुत्तमं वीरायेनपरानंदपदंप्राप्स्यत्यनामयं १ योगिनीचक्रमध्य
स्थंमातृमंडलवेष्टितं नमामिशिरसानाथंभैरवंभैरवीप्रियं २ अनादिघोरसंसारव्या
धिध्वंसैकहेतवे नमःश्रीनाथवैद्यायकुलौषधप्रदायिने ३ आपदोदुरितंरोगाःसम
याचारलंघनात् येसर्वेध्वापोहंतुदिव्यचक्रस्यमेलनात् ४ आयुरारोग्यमैश्वर्यंकीर्ति
लाभःसुखंजयः कांतिर्मनोरथश्चास्तुयांतुसर्वाश्चदेवताः ५ संरक्षकानांप्रतिपालका
नांयंतीन्द्रयोगींद्रतपोधनानां देशस्यराष्ट्रस्यकुलस्यराज्ञःकरोतुशांतिंभगवान्कुलेशः ६

प्रा.
स्त.
३८

नंदंतुसाधककुलान्वयदर्शिकायेस्त्वाघनाखिवतंतुकमहान्वयाये नंदंतुसर्वकु
लकौलरतायेरेयेप्यन्येविशेषपदभेदकपांभवाये ७ नंदंतुसिद्धगुरवःस्वतंत्रा
क्रमोद्याज्येष्टानुगाःसमयिनोवटुकाःकुमार्याः षट्योगिनीप्रवरवीरकुलप्रसूता
नंदंतुभूमिपतिगोद्विजसाधुलोकाः ८ नंदंतुनीतिनिपुणानिरवद्यनिष्ठानिर्मत्स
रानिरुपमानिरुपद्रवाश्च नित्यानिरंजनरतागुरवोनिरीहाः शांताश्चशांतमनसो
ल्लुनशोकशंकाः ९ नंदंतुयोगनिरताःकुलयोगयुक्ताआचार्यसामयिकसाधकपु
त्रकाश्च गावोद्विजायुवतयोयतयःकुमार्योधर्मेभवंतुनिरतागुरुभक्तियुक्ता १०
नंदंतुसाधकवराअणिमाद्यनिष्ठाःशापाःपतंतुसमयद्विषयोगिनीनां साशांभ
वीस्फुरतुकापिममाद्यवस्थायस्यांगुरोश्चरणपंकजमेवलभ्यं ॥ याश्चक्रक्रमभू
मिकावसतयोःनाडीषुयाःसंस्थिता याःकायडुमरोमकूपनिलयायाःसंस्थिता

यात्तत्र उच्छ्वासोर्मिमरुत्तरंगनिलया निःश्वासवासाश्रया स्तादेव्यो विश्वभक्तभक्त
णपरास्त्वंपांतु कौलार्चिताः १२ या दिव्यक्रमपालिकाः क्षितिगता या देवतास्तोयगा
या नित्यं प्रथिताः प्रभाः शिखिगता या मातरिश्वाश्रयाः या व्योमामृतमंडलामृतमया
याः सर्वगाः सर्वदास्ताः सर्वाः कुलमार्गपालनपराः शांतिं प्रयच्छंतु मे १३ ऊर्ध्वं ब्रह्मांडतो वा
दिवि गगनतले भूतले निष्कले वा पाताले वानले वा सलिलपवनयोर्यत्र कुत्र स्थिता वा क्षे
त्रे पीठोपपीठादिषु च कृतपदा धूपदीपालिमांसैः प्रीता देव्यः सदान्नः कृतविधिवलिना यां
तु वीरेंद्रवंद्याः १४ ब्रह्माग्नीशेषदुर्गागुह्यवटुकगणा भैरवाः क्षेत्रपाला वेतालादित्यरुद्र
ग्रहवसुमनुसिद्धाप्सरोगुह्यकाद्याः भूतानागर्षिविद्याधरऋषिपितृयक्षासुराहिप्रभू
ता योगीशाश्चारणाः किंपुरुषपशुनिस्वराश्च क्रमाः पांतु सर्वे १५ देहस्याखिलदेवतागा
जमुखाः क्षेत्राधिपा भैरवा योगिन्यो वटुकाश्च यक्षपितरो भूताः पिशाचा ग्रहाः अन्ये

शा॰ भूचरादिकचराश्च खेचरा वेतालकाश्चेटकाः तस्माः सः कुलवृत्रकस्य पिवतः पानं स
सू॰ दीपं चरुं १६ सन्तं चेत्कृत्वा कामेव पितृदेवाः शेषवयोगिनी प्रीतिश्चाग्रपरदेवनाचय
३९ दिचेहेदाः प्रमाणं च चेत् शाक्तेयं यदि दर्शनं भवति चेदा त्रेयमेघास्ति चेत्सेत्वाशापि
च कौलिकाश्च यदि चेत्सान्मे जयः सर्वदा १७ त्वं यन्त्र मातरः सर्वाः समुद्राः सगणापिपा :
योगिन्यात्तेत्रपालाश्च मम देहे व्यवस्थिताः १८ शिवाद्यवनिपर्यन्तं ब्रह्मादिस्तम्भसंयुतं का
लाग्न्यादिशिवान्तं च जगद्येनेन तत्पणतु १९ पठित्वेदं नमेहीरान्वीरवंदनमाचरेत् स्त्वेहे
रात्रमेहीरान्मंत्रसिद्धिः प्रजायते २० इति शान्तिस्तोत्रं अथ वीरवंदनस्तोत्रं जगत्त्रयाभ्यर्चि
तशासनेभ्यः परार्थसंपादनकोविदेभ्यः समस्तहृतक्लेशमहोरगेभ्यो नमो नमः साधक
नायकेभ्यः १ प्रहीनसर्वाशयवासनेभ्यः सर्वार्थतत्त्वोदितसाधनेभ्यः सर्वप्रजाभ्युद
यणोदितेभ्यो नमो नमः साधकनायकेभ्यः २ निस्तीर्णसंसारमहार्णवेभ्यः स्वस्थालतो

न्मूलनतत्परेभ्यः जरारुजामृत्युनिवारकेभ्यो नमो नमः साथकनायकेभ्यः ३ सद्धर्मर
त्नाकरभाजनेभ्यो निर्वाणमार्गोपदेशिकेभ्यः सर्वत्रसंपूर्णमनोरथेभ्यो नमो नमः साथ
कनायकेभ्यः ४ लोकानुकंपाभ्युदितादरेभ्यः कारुण्यमैत्रीपरिभावितेभ्यः सर्वार्थिचर्या
परिहारकेभ्यो नमो नमः साथकनायकेभ्यः ५ विध्वस्तनिःशेषकुवासनेभ्यो ज्ञानाग्निनाद।
ग्धमलेपनेभ्यः अज्ञानप्रतिज्ञापरिहारकेभ्यो नमो नमः साथकनायकेभ्यः ६ सर्वार्थिनाशा
परिहारकेभ्यो वैनेयपद्माकरबोधकेभ्यः विस्तीर्णसर्वार्थगुणाकरेभ्यो नमो नमः साथकना
यकेभ्यः ७ अनंतकर्मार्जितशासनेभ्यो ब्रह्मेन्द्ररुद्रादिनमस्कृतेभ्यः परंपरानुग्रहकारकेभ्यो न
मो नमः साथकनायकेभ्यः ८ विभग्नभूतादिमहाभयेभ्यो मपंचकाचारपरायणेभ्यः समस्त
सौभाग्यकलाकरेभ्यो नमो नमः साथकनायकेभ्यः १० विभग्नदुष्कर्मजवासनेभ्यः समस्ततोजु
ष्टमहाशयेभ्यः लब्धामलज्ञानकृतास्पदेभ्यो नमो नमः शंभविशंभवेभ्यः ११ सर्वागमा

पुरा. मोयिमहात्मवेभ्यः श्रीचक्रपूजार्थपरायणेभ्यः श्रीवीरचर्याचरणात्तमेभ्यो नमो नमः शंा
पृ. भविशंाभवेभ्यः १२ श्रीमंत्रकोटिद्युतिभूषणेभ्यो द्वाविंशदुल्लासदशातिगेभ्यः अद्वैततत्त्वा
५. मृतभाजनेभ्यो नमो नमः शंाभविशंाभवेभ्यः १३ षट्त्रिंशतालक्षणभूषितेभ्यः प्रोत्फुल्लपद्मा
करलोचनेभ्यः प्रतप्तचामीकरविग्रहेभ्यो नमो नमः शंाभविशंाभवेभ्यः १४ सेवोपसंभारा
सुसंस्थितेभ्यः संसारनिर्वाणनिदर्शनेभ्यः महाकृपावेष्टितमानसेभ्यो नमो नमः शंाभविशंा
भवेभ्यः १५ परैक्यविज्ञानरसाकुलेभ्यो वामाश्रिताचारभयानकेभ्यः स्वातंत्र्यविध्वस्तजगन
मभ्यो नमो नमः शंाभविशंाभवेभ्यः १६ श्मशानचर्यासमहाफलेभ्यो मोहान्धकारापह।
तित्तमेभ्यः परस्परत्तापरिपालकेभ्यो नमो नमः शंाभविशंाभवेभ्यः १७ विमुक्तकेशालिक
पालकेभ्यः स्फुरासवारक्तविलोचनेभ्यः नवीनकांतारतनस्वरेभ्यो नमो नमः शंाभविशंाभवे
भ्यः १८ विभूतिलिप्तांगदिगंबरेभ्यो चिताग्निधूमालिभयानकेभ्यः कपालपात्रामृतपानके

भ्योनमोनमःभैरविभैरवेभ्यः १९ सिद्धौकथानमहामुनिभ्यः श्रीभैरवाचारकृतादरेभ्यः
स्वाधीनतास्यःकृतनिर्जरेभ्योनमोनमःभैरविभैरवेभ्यः २० प्रशांतशास्त्रार्थविचारके
भ्योनिह्नुतनानारसकाव्यकेभ्यः निरस्तनिःशेषविकल्पनेभ्योनमोनमःभैरविभैरवेभ्यः २१
स्वात्मैक्यभावानविनाशयेभ्यःसायुज्यसाम्राज्यसखोकरेभ्यः श्रीसच्चिदानंदितविग्रहेभ्यो
नमोनमःभैरविभैरवेभ्यः २२ परप्रसादास्पदमानसेभ्योब्रह्माद्वयज्ञानरसाकुलेभ्यः शि
वोहमित्याश्रितचेतनेभ्योनमोनमःभैरविभैरवेभ्यः २३ सर्वथासवेदासर्वसार्वज्ञघटपटा
दिसत् जगज्जनितविस्तारंब्रह्मेदमितिवेद्म्यहं २४ अहमेवपरोहंसःशिवःपरमकार
णं मत्प्राणेसततपश्चात्मालीनःसमरसंगतः २५ सच्चिदानंदनिलयंपरंपरमकारणं शि
वाद्वयप्रकाशाख्यंप्रणमामलंधामधीमहि २६ अनेनवीरस्तवकीर्तनेनसमुद्गतक्लेश
स्ववासनोहं संसारकांतारमहार्णवेस्मिन्निमज्जमानंजगदुद्धरेयं २७ नेदंतसाय।

प्रा. काःसर्वैविनश्यंतुविघ्नकाः प्रवक्ष्याम्यांभवीमेस्तुप्रसन्नोस्तुगुरुःसदा इतिपठन्सर्वा
ह. न्सामयिकानभिषिंच्य विशेषार्घ्यपात्रमुद्धृत्य शिरसिस्थितायगुरवेसमर्प्य तत्पादुका
४१ स्थिःसमभ्यर्च्य मूलविद्ययागुरुपादुकाविद्यांतेचस्वाहेति स्वमूलाधारंकुंडलिन्यात्म।
कपरदेवतायैस्वेहूत्वनंतद्या तज्जलंपात्रांतरेकृत्वाऽस्नीयात् शेषंप्रियशिष्यायप्रसाद
बुद्ध्याकिंचिद्दद्यात् सोपिस्वपात्रेकृत्वा तज्जलंप्राश्नीयात् इत्यमर्घ्यप्रतिपत्तिः ततःस्व
गुरूपदिष्टविधिनाशेषंकृत्यंसमापयेत् ततस्ताम्रादिपात्रेगंधपुष्पाक्षतान्वितंजल
मादाय नमोविवस्वतेब्रह्मन्भास्वतेविष्णुतेजसे नमःसर्वेश्वरायचयेसवित्रेकर्मदायि
ने ॐह्रांह्रींहंसःसूर्यपर्षतेऽर्घ्यःस्वाहेतिसूर्यायार्घ्यंदत्वा कृतांजलिः यत्तच्छिद्रंतपश्छि
द्रंयच्छिद्रंपूजनेमम सर्वंतदच्छिद्रमस्तुभास्करस्यप्रसादतः इत्यच्छिद्रमवधारये
त् ततोमूलविद्यायाःप्राणायामत्रयंकृत्वा ऋष्यादिकरषडंगन्यासान्विधाय षडा।

सनवाद्देवताष्टकन्यासान्विधाय प्रागुक्तगुरुस्तोत्रं पठित्वा श्रीगुरुं प्रणम्य मूल
विद्यया द्वितीयबीजेन निर्माल्यं शिरसि धृत्वा मूलविद्यया पदचरणोदकं स्वीकृत्य
श्रीपरदेवताभक्तेभ्यो नैवेद्यादिकं दत्त्वा स्वयमपि स्वसुहृद्यौवजनैः साकं भुक्त्वा स्वात्मा
नं कामकलारूपं भावयन् सर्वं विहरेदिति शिवं स्वात्रग्रहावाम्नपदैः साहित्यकौला।
भिधाश्रमे कृत्वा तीर्थार्थिनासेवाशारिकापद्धतिर्लेखः ॥

श्या॰ ॐश्रीदेव्यैसदासुफलदायिन्यैनमः श्रीभैरवउवाच अधुनादेविवक्ष्यामिशारिकाक
क॰ वचंपरं त्रैलोक्यमोहनंनाममूलमंत्रमयंपरं अस्यश्रवणमात्रेणसर्वयज्ञफलंलभेत्
१ सर्वापन्नाशनंदिव्यंसर्वसिद्धिप्रदंकलौ सर्वस्वमेरहस्यमेपरमंपरमाद्भुतं धारणादस्यदे
वेशिविष्णुनामजलोद्भवः दानवेंद्रोहतःशीघ्रंमंधकारोयथेंदुना मयापित्रिपुराध्वंसोदा
नवोविष्णुनाबलः जेवोहंब्रह्मणोदेविप्रभावादस्यवर्मणः कवचस्यास्यदेवेशि ऋषिर्भै
रवईरितः त्रिष्टुप्छंदोदेवताचत्रैलोक्यमोहनेश्वरी शारिकाशर्मबीजंचमाशक्तिःकील
कंगजः त्रैलोक्यमोहविघार्थेविनियोगःप्रकीर्तितः ॐमेदुर्गाशिरःपायादेकाक्षरवि
भूषणा ॐह्रींचंडीललाटंमेजगदाह्लादरूपिणी ॐह्रींश्रींअवतात्पातुभ्रुवौमेभगमालि
नी ॐह्रींश्रींह्रूंचनेत्रेव्यात्सर्वमंगलमंगला ॐह्रींश्रींह्रूंफ्रांश्रवात्मेश्रुतीशंकरवल्लभा
ॐह्रींश्रींह्रूंफ्रांश्रांपातुनासानारायणेश्वरी ॐह्रींश्रींह्रूंफ्रांश्रांशांमेपातुवक्त्रंसरस्वती

अं आं इं ईं रदान्पातु मातृकाशेखरेश्वरी उं ऊं ऋं ॠं ऌं ॡं पंपं पायाद्दोष्ठौ भवप्रिया ॐ ओं औं अं अः
गलं पातु नीलकंठासनेश्वरी कं खं गं घं ङं मे पातु स्कंदौ स्कंदसमर्चिता चं छं जं झं ञं मे पातु
वक्षो वामप्रियांविका टं ठं डं ढं णं मे पायात्पार्श्वौ पर्वतनंदिनी तं थं दं धं नं मे पातु कुक्षिं
कुलाकुलेश्वरी पं फं बं भं मं मे पातु नाभिं नारदसेविता यं रं लं वं गुदं पातु गुह्यकेश्वराप-
जिता शं षं सं हं कटिं पातु देवी कात्यायनी सदा लं क्षं ऊरू सदा पातु सर्वसारस्वतप्रदा ॐ
श्रां जानू शिवा पातु ॐ श्रीं जंघे वनादुमा ॐ ह्रां पादौ सदा पातु राजमातंगिनी मम ॐ ह्रूं पा-
दादि मूर्धांतं वपुर्मे पातु कुब्जिका ॐ श्रीं मूर्धादिपादांतं वपुर्मे पातु शारदा ॐ ह्रीं समात्वरा
पातु शारिका सकलं वपुः सर्वे मां पातु ब्रह्माणी वह्नौ माहेश्वरी सदा दक्षिणे वतु मां चं-
डी नैरृते मेऽपराजिता पश्चिमे वतु कौमारी वायव्ये शांभवी च मां वाराही चोत्तरे पायादी-
शाने नारसिंहिका प्रभाते मातृमा पातु मध्ये कामावतात्स्रमां चार्वंगी मां दिनांते व्यात्रि

शा॰ क॰ २

शान्दोंटंकधारिणी निशाथेवाङ्ग्यनारा निशांतेपार्वतीचमां सर्वज्ञरुद्रिणीपातुशि
वामांपातुसर्वदा अग्निनांगःस्थितेपातु हरुर्मांपातुपाथमः चंडेशमांपातुमरुतः क्रोधो
ध्यान्मांहुताशनात् उन्मत्तःसोमतःपातु कपालःसूर्यतोवतु भीषणोयज्ञविघ्नांतसंहार :
श्मशानमंडलात् रणेमांकालिकापातु द्यूतेत्रिपुरसुंदरी दुर्गावतु विवादेमां श्रीचक्रेश
वेदावतु सर्वज्ञसर्वदादेवीपातुमांशारिकापरा यंत्रेशरेखतान्दाराञ्चरहंयदनुमाम
कं ततन्ममशिवःपातु वामदेवस्त्रिदीश्वरः इत्येतत्कवचंदिव्यंत्रिषुलोकेषुदुर्लभं त्रै
लोक्यमोहनेनामशारिकायारहस्यकं विनाऽनेनानसिद्धिःस्यात्कवचेनेपार्वति
कोटिलक्षप्रजप्तस्यमंत्रस्यास्यमहेश्वरि तस्मात्पठेद्विजेवर्मामंत्रगर्भमनुत्तमं सर्वो
त्पातप्रशमनंबलवृद्धिप्रवर्धनं परमानंददंलोके परमैश्वर्यकारणं यःपठेत्पाठये
द्वापिशृणोतिश्रावयेदपि सएवभैरवःप्रत्यक्षैलोक्यविजयीविभुः रवौभूर्जेलिख

द्मेस्वयंभूकुसुमस्रजा कुसुमेनाष्टगंधेनस्वन्येननिजरेतसा धारयेन्मूर्ध्निवाबा
हौप्राप्नुयात्परमांगतिं धनकामीलभेद्वित्तंपुत्रकामीलभेत्प्रजां रोगीरिपुज्वरेहत्वाक
ल्याणीशतसहस्रमाविशेत् एत्वावच्चसिदेवेशिवाग्मित्वंजायतेक्षणात् वंध्याचकाकवंध्या
चमृतवत्सालभेत्सुतान् मार्कंडेयायुषोदेविप्राप्ताहंश्रवणोपमान् किंकिंनलभते
मर्त्यःपठन्कवचमुत्तमं यःपठेदर्धरात्रेतुश्मशानेशुक्रकुंतलः पीताशीयुग्मदेवेशि
देवीदर्शनमाप्नुयात् स्तंभयेद्राक्षरंवापुमोहयेत्रिजगद्ध्रुवं वहुकिंकथ्यतेतस्यक।
वचस्यचधारणात् पठनाच्छ्रवणाद्वापिसमभवेद्भैरवोपमः इतीदंकवचंदेवित्रैलोक्यव
शकारणं त्रैलोक्यमोहनंनामगोपनीयंस्वरेस्मरि यस्मैकस्मैनदातव्यंविनाशिष्यायपा
वैति दीक्षितायकुलीनायदत्वामोक्षमवाप्नुयात् विनादानेनशक्तणीयात्तद्याद्दक्षिणां
विना दत्वाशक्तीत्वाप्ससयोःसिद्धिहानिर्भवेद्ध्रुवं अन्यथायस्तुशक्तणीयाद्घाताकव

पा॰
क॰
३

येषां पुत्रान्दारान्सततं स्वेव योगिन्यो भक्षयंति हि अज्ञात्वा कवचं देवि एनये क्लीं शिलां
शिवे सम्भवेच्छिव हास्तस्य सर्वोपद्रवसंकुलः एत्वायः कवचं देवि पुज्जयेदं विकोनरः स
एव परमां सिद्धिं लभते नात्र संशयः इतीदं कवचं देवि सारात्सर्वस्वमुत्तमं रहस्यं शारि।
कारत्नं गोपनीयं स्वयोनिवत् इति श्रीरुद्रयामले तंत्रे दशविद्यारहस्ये श्रीशारिकाकव
चं संपूर्णम् ॥

शा॰ स॰ १

ॐ श्रीदेव्यैनमः श्रीभैरवउवाच कथयामि परां विद्यां सहस्राक्षाभिधां शिवे शिलायाः
शारिकाख्यायाः परं सर्वस्वरूपिणी विनानित्यक्रियां देवि विनान्यासं विनार्चनं विनापुरश्च
र्यां जाप्यं विनाहोमं च तर्पणं विनाश्मशानगमनं विनाममयपूजनं ययालभेत्फलं सर्वं तां वि
द्यां शृणु पार्वति यादेवी चेतनालोके शिलारूपास्ति शारिका सृजत्यवति विश्वं तं संहरिष्यति
तामसी सैव संसारिणां देवि परमैश्वर्यदायिनी परं पदं प्रदाप्यं ते महाविद्यात्मिकाशिला त
स्यानामसहस्रं ते वर्णयामि रहस्यकं रहस्यं मम सर्वस्वं सकलाचारवल्लभे योजपेत्परमां
विद्यां पठेदाख्यासहस्रकं धारयेत्कवचं दिव्यं पठेत्स्तोत्रं च यत्परं किं तस्य दुर्लभं लोके नात्र
याघघदीश्वरि अस्य श्रीशारिकामंत्रनामसहस्रस्य महादेवऋषिः अनुष्टुप्छंदः श्रीशारि
कादेवता शां बीजं श्रीं शक्तिः फ्रां कीलकं धर्मार्थकाममोक्षार्थे पाठे विनियोगः ध्यानम्
बालार्ककोटिद्युतिमिंदुचूडां वरासिचक्राभयवाहुमाद्यां सिंहाधिरूढां शिववामदेवलीं।

नोभजेचेनसिशारिकेशी ॐ ह्रीं श्रीं ह्रूं फ्रां ग्रां शां श्रीः शारिकाश्यामसुंदरी शिलाधारीसु
कीशांताश्यामाश्यामपयोधरा देवीशशांकबिंबाभाशशांककृतशेखरा शार्दूलचर्मवस
नाशांतिः शार्दूलवाहना गौरीपद्मावतीपीतापीनवक्षोजकुड्मला पीतांबरारक्तदंतादा
डिमीकुसुमोपमा स्फुरद्दंतांशुखचितादीप्तादीप्तशिखोदया दयावतीकल्पलताकल्पांत
दहनोपमा भैरवीभीमनादाचभयानकमुखोभगा कारोकारुण्यरूपाचक्रकुक्कुलाकृशोद
री कादंबरीपटोत्कृष्टापरमापरमेश्वरी सतीसरस्वतीसत्यासत्यासत्यस्वरूपिणी पंचपरा
पटाकारापाटलापाटलप्रभा पद्मिनीपद्मवनदापद्मापद्मकराशिवा शिवाश्रयाशरत्कुं
ताप्राचीरंभाविभाविनी द्युमणिप्रस्तरापाठापीठेशीपीवराकृतिः अचिंत्याश्वसलाधारा
मातंगीमधुरस्वराः अतीवसुंदराकारासुंदरीसुंदरालका अलकानाकमध्यस्थापातालत
लचारिणी अनंतानंतरूपाचशमीश्यामाकवीजिनी विभासाभास्वर्णाचसमसस्तासरत्या।

शा॰ तिनी स्वधा स्वरा स्वरेक्षणा नीलकण्ठाणुवल्लभा हविः स्वाहा स्वाहेशनेशा च भूर्भुवःस्वःस्वरूपिणी
स॰ भूमिर्भूर्देवपूजा वसवो यशः स्वात्मपूजका आनंदकंदली कंदा स्कंदमाता शिवालया चेत
२ नाचिद्रवाकारा भवपत्नी भयापहा विघ्नेश्वरी गणेशानी विघ्नविध्वंसिनी निसा वशावशि
जनस्तुता स्तुतिः श्रुतिधरा श्रुतिः वेद्या वेदमयी विद्या विद्यात्त्ववरदा वधूः वामा वामेश्वरी
वाम्या कुला कुलविचारिणी वितर्का तर्कनिलया प्रलयानलसन्निभा यज्ञेश्वरी यज्ञमुखा
याजका यानपात्रका यज्ञेश्वरी यज्ञधात्री पार्वती पर्वताश्रया पिलेपिलपदस्थाना पद्दा
नरकांतका नारी नर्मप्रिया श्रीदा श्रीदश्रीदा शारा स्तुधा कामेश्वरी रति हूंति राकृति हव्य
वाहना हेरेश्वरी हरिवपुर्हाटकांगदमंडिता हंसगा स्वर्गतिर्वैद्या स्वर्भुवा चमहौषधिः
सर्वरोगहरा साध्वी मरुत्कुसुमप्रभा माधवी माधवीवल्ली मधुमत्ता मदालसा मारप्रिया
मरुत्हरा हरिकांता मनोन्मना महावैद्यप्रिया वैश्रणा वैश्रणाचारा स्वरार्चिता सामंनाथी नवा।

शुभीशुटीगुर्वीगरीयसी कालांतकाकालमुखोकठोराकरुणामयी नीलानाडीचवागीशी
दूर्वानीलसरस्वती अपारपारगागम्यागतिःप्रीतिःपयोधरा पयोदसदृशच्छायापारदाक्ष
तिरालसा सरोजनिलयानीतिःकीर्तिःकीर्तिकरीकथा काशीकाम्याकपर्दीशाकाशशुष्ठोप
मारमा रमारामप्रियारेवादेवकीदेववत्सला हंसोङ्गतिगतिर्दर्भोदमनीविजयाजया अशोष
स्वरसंसज्ञानिःशेषास्वरस्यंदिनी नंदिनीवटमूलस्थालासहासैकवल्लभा अरूपानिर्गुणी
सभ्यासभासंतोषवर्धिनी सौम्यायजुर्वेद्यायाम्यायमुनायामिनीयमी दत्तादायादवरदादा
स्पसेव्यादरीश्वरी पौरंदरीपुलोमेशी॥ पौलोमेपुलकांकुरा समस्तवर्णनिलयासमस्तगुरुव
ल्लभा समस्तमुंडमालाढ्यामालिनीमधुपस्वना कोशप्रदाकोशवासाचमत्कृतिरलंकुसा हास
हासदसद्रूपासर्वकारणमयीस्मृतिः सर्वाक्षरमयीविद्यामूलविद्येश्वरीश्वरी अकारषोडशाका
राकारांवयविमोचिनी ककारव्यंजनाक्रांतासर्वमंत्राक्षरालया अमाएउरूपाप्यमलाचैगुणा

शा. एषाप्यपराजिता अंबिकाबालिकाचांबाअनंतगुणमेखला अपर्णापर्णशालाचसाट्टहासा
स. हसंतिका अद्रिकन्यापट्टहासाप्यजरामाप्यरुंधती अज्ञाताचाज्ञिनीदेवीलांगुजासन
३ रंजिता अन्तरामातृकादेवीसर्वानंदकरीकला आनंदसुंदरीआद्याअचूर्णारुणलोचना
आदिदैवांतकाक्रूराआदित्यकुलभूषणा आबीजमंडनादेवीआकारमातृकावलिः इंद्रलु
तेंडुबिंबास्याइनकोटिसमप्रभा इंदिरामंडराशाली इतिहासाकथास्मृतिः इलाचेक्षुरसा।
स्वादाइकारान्तरईश्वरी ईश्वरीभैरवप्राख्याचेशानीश्वरवल्लभा ईशाकामकलादेवीईकारा
श्रितमातृका उग्रप्रभोग्रचिताचउग्रवामार्गवासिनी उष्णावैस्नवपूज्याचउग्रतारोल्मुकान
ना उमेश्वरेश्वरीश्रेष्ठाउकारोद्भासमातृका ऊष्मापूषात्मभूषणावतथोत्तरदिविप्रभा ऋणहृ
द्वीऋकारेशीऋलृवर्णाॡवर्णभाक् लृकारप्रकृतिर्लीलावालादित्यसमप्रभा एणांकखंडऊटा
देहापकारोद्भासस्फटिनी ऐंकारशेखरादेवीऐचिन्त्यपदमंडिता अंभोजनिलयास्यानाम्रः

स्वरूपाचस्वर्गतिः षोडशस्वरसंपन्नाकमलाकमलोद्भवा कामेश्वरीरंजितागोऊमारी
कुब्जिकाकला कामाकामप्रियाकीराकमनीयाकपर्दिनी कालिकाभद्रकालीचकाला।
कामांतकारिणी कपालिनीकपालेशीकर्पूरचयचर्चिता कादंबरीकोमलांगीकाश्मीरी
ॐऊमद्युतिः ऊंनाहूर्चीर्णवीजाप्याकमलांगीऊलाऊला करालास्याकरालाक्षीविकराल
स्वरूपिणी काम्यालकाकामडेव्याकामिनीकामपालिनी कंथाधराकृपाकर्त्रीककाराक्षर
मातृका खड्गहस्ताखर्परेशीखेचरीखगगामिनी खगासनाखलोलाक्षीखेटेशीखलनाशि
नी खेटकायुधहस्ताचखरांशुद्युतिसन्निभा खांताजवीजनिलयाखकोरोल्लासमातृका
गणपागजास्यवदनागणेशजननीगया गोदावरीगदाहस्तागंगाधरवरप्रदा गोधागोवा
हनेशानीगरलाशरवल्लभा गांभीर्यभूषणागंगागकारार्णविभूषणा घूर्णाघोणाकरस्त
न्याघुर्घुरारावघोरनादिनी घटस्थाघटजासेव्याघनरूपाघनेश्वरी घनवाहनसेव्याचघका

श्या.
स.
४

रान्तरमातृका ङंताङ.वर्णानिलयाङाएउरूपाङ.णालया ङंघोङेंताङ.ङाजाण्ड.वर्णा
न्तरभूषणा चामीकररुचिश्चंद्रीचेंद्रिकावंद्रगागिणी चलाचोलाचंचलाचवंचरीकालक
प्रभा चंचरीकस्वनालापाचमत्कारस्वरूपिणी चङ्काचाङ्कीचाचीवएणाचएपकसन्निभा
चीनांशुकधराचाङ्ङकारान्तरभूषणा छश्रीछत्रधराछत्राच्छिन्नमस्ताच्छजाच्छविः
छायासुतप्रियाभायाछवर्णामलमातृका जगदंबाजगज्ज्योतिर्ज्योतीरूपाजटाधरा जयदा
जयकर्त्रीवजगत्कर्त्रीजरांतरा ज्वरघ्नीजंवदमनीजगत्प्राणाजयावहा जैत्रीजंवारिवद
नाजीवनाजीववाक्प्रदा जाग्रतिस्थजगन्निद्राजगद्योनिर्जलेधरा जालंधरधराजायाजका
रान्तरमातृका झंपाकिंजेश्वरीझंतापकारान्तरमातृका ञाएउरूपात्रिणीवामाञकारी
णीञलायुधा ञवर्गवीजभूषाढ्याञकारान्तरमातृका टंकायुधाटकाराढ्याटोटाह्वीटस
ञंतला टंकायुधाटकीरूपाटकारान्तरमातृका ठक्कुराटक्कोरेशानीठकारजितयेश्वरी

ठःस्वरूपाठवर्णाख्याःठकारान्तरमातृका डकाडकेश्वरीडिंवाडवर्णान्तरमातृका ढिणी
ढेयाढिल्लहस्ताढकारान्तरमातृका णीशाणांनाणवर्णानाणकारान्तरक्षमा तरीत
यीतलारूपा त्रिपुरातामसप्रिया तोतलातारिणीतारा सप्तविंशति रूपिणी त्रिपुरात्रिपु
राध्येयांसेवकेशीत्रिलोकरक्षा त्रिवर्गेशीत्रयीमती त्रिपदावेदरूपिणी त्रिलोकजननीशान्ता
त्रिपुरेश्वरपूजिता तापसीतोमरप्रख्यातंवरुस्वननादिनी तलाकोटिस्वनातापीतपसां
फलवर्धिनी तरीतरणिरूपाचतकारान्तरमातृका स्थलीस्थविररूपाचस्थला स्थालीस्था।
लाग्निनी स्थविरेशास्थलमुखीथकारान्तरमातृका दन्तिकाशिवदन्तीवदंडायुधधराद्युतिः
दयादीनानुकंपाचदेवोलियरवल्लभा देशानुचारिणीदेवकाढ्याविदेशीदवीयसी दानाय
णीदुमलतादेवमातादिदेवता दधिजाडुलेमादेवीदकारान्तरमातृका धर्म्माधर्मप्रसूर्धन्या
धनदाधनवर्धिनी धृतिर्धनाधनप्रधवस्थ्येकारान्तरमंडला नलिनीनालिकानाध्यानारायणय

श्या·
स·
५

धारिणी नीपोपवनमध्यस्थानागेश्वरीनरोत्तमा नरेश्वरीनन्दपाथ्यन्तानरनारायणप्रसूः नर्त्तकीनी
रजातीचनवर्णान्तरभूषणा पद्मेश्वरीपद्मगन्धोपद्मस्थानापरापरा पारावारसुतापीठापरवर्गवि
मर्द्दिनी पुःशुरविदुःपापापत्नीपक्षिणवाहना पीवरांसापतिप्राणापीतानन्दीपतिव्रता पाठा
पीठस्थितापीतावस्त्रालंकारभूषणा पुरुरवसुतापौत्रीपुत्रिकापुत्रदाप्रजा पुष्पोत्तंसापुष्पव
तीपकारान्तरमातृका फलदापीतवस्त्राचफेरवारावभीषणा फल्गुणीफल्गुतीर्थस्थाफव।
ीकृतमंडला वलदावलखिल्याचवालावलरिपुप्रिया वाल्यावस्थावधीश्वरीबकाराकृति।
मातृका भद्रिकाभीमपत्नीचभीमाभर्गशिवाभया भयघ्नीभीमनादाचभयानकमुखेक्ष।
णा भिल्लेश्वरीभीतिहराभद्रदाभाग्यवर्धिनी भगमालाभगावामाभवघ्नीभवतारिणी भग
योनिर्भगाकाराभगस्थाभगरूपिणी भगलिंगामृतप्रीताभकारान्तरमातृका मान्यामानप्रदा
मीनामीनकेतनलालसा मदोद्धतामनोन्मान्यामेनामेनाकवत्सला मानार्त्तिर्मत्स्यरूपाच।

मत्स्यघातामहत्तरा मेरुशृंगाग्रतुंगाग्रमोदकाहाररञ्जका मातंगिनीमत्तमदामदम।
नामठेश्वरी मज्जाभ्रगयाननाभ्रगयामकाराकारभूषणा यशस्विनीयतीशानीयत्नकर्त्रीयज्ञः
प्रिया यज्ञधात्रीयज्ञफलायज्ञर्वेदऋचांफले यशोदायतिसेव्याचयात्रायात्रिकवत्सला
योगेश्वरीयोगगम्यायोगेंद्रजनवल्लभा यज्ञसूत्रीयमघ्नीचयकाराक्षरमातृका रत्नेश्वरीर।
मानाथसेव्यारथ्यारजस्वला राज्यदाराजराजेशीरोगहर्त्रीरजोवती रत्नाकरस्तनारम्याराज्ञी
रात्रिपतिप्रभा रक्षोघ्नीराक्षसेशानीरक्षोनाथसमर्चिता रतप्रियारतस्थ्लवारकाराकृति।
शेखरा लंबोदरीललज्जिह्वालास्यतत्परमानसा लूतातंतुवितानास्यालक्ष्मीलीजालयारि
णी लोकेश्वरीलोकधात्रीलाटस्थालक्षणाकृतिः लंकालंबककोल्हासालकाराकारवर्णिनी
लिंगस्त्रीताकलंगेशीलिंगस्थालिंगलिंगिनी लिंगेश्वरीलिंगरसालिंगमालालसद्युतिः ल
यदालक्षणालोलालकाराक्षरमातृका वाराहीवरदात्रीचवीरसूर्वीरसूदिनी वीरेश्वरीवीर

श्या. स. ६

जन्मावीरवर्वर्णवर्चिता वगायुधावगाकाचवामनावमनाकृतिः वक्ष्तावथकावथ्याव
ध्यभूर्वर्णिजप्रिया वसंतलक्ष्मीर्वटुकीवटुकावटुकेश्वरी वटुप्रियावामनेत्रावामाचौरक
लालसा वांतावाप्यावगारोहावेदमातावसुंधरा वयोयानावयस्याचवकाराचारमातृका
शंभुप्रियाशरश्चर्चाशाद्वलाशशवत्सला शीतद्युतिःशीतरमाशोणोष्ठीशीकरप्रभा श्रीवत्स
लांछनाशर्वाशर्ववामांगवासिनी शशांकामललक्ष्मीश्च शार्दूलतनुरद्विजा शोथहृच्छ्रीशमी
मूलाशाकाराकृतिशेखरा षोडशीषोडशांतस्थाषडाषोढाषडानना षट्कूटाषट्रसास्वादाष
ड्शीतिशुखांबुजा षडास्यजननीषंढाषवर्णान्तरमातृका सारस्वतप्रसूःसर्वासर्वगासर्वतो
मुखा समासीतासतीमातासागराभयदायिनी समस्तपापशमनीसालभंजीसदक्षिणा स्व
श्रुतिस्वरसासाध्वीसामगासामवेदजा सत्यप्रियासोमसुखीस्त्वञ्चश्यास्मृतवल्लभा सनकेशीस्व
नेदाचस्वर्वर्गस्यासनातना सेतुश्चनासमस्ताशाससकाराकारवल्लभा हलाहलप्रियाहेलाहा

6

हारावविभूषणा हाहाहूहूस्वरूपा च हलयात्रीहलप्रिया हरिनेत्राघोररूपा हविष्याहु-
तिवल्लभा हं वं लं त्रंः स्वरूपा च सर्वमातृकपूजिता ऐं पें सौः ह्रीं महाविद्या शं ग्रों फ्रों हूं स्वरूपि-
णी इति श्रीशारिकादेव्या मंत्रनामसहस्रकं पुण्यं पुण्यजनस्तंत्रसर्वैस्सर्वपूजितं इदं यः
पाठयेद्देवि श्रावयेद्वा शृणोति वा स एव भगवान्देवः सत्यं सत्यं सुरेश्वरि एककाले द्विकालं
वा त्रिकालं पठते नरः वामाचारपरो देवि तस्य पुण्यफलं शृणु मूकत्वं वधिरत्वं च कुष्टं हन्या-
त्स्थित्रिकां वातपित्तकफान्गुल्मान् रक्तस्रावं विषूचिकां सद्यः शमयते देवि शुद्धयायः प-
ठेन्निशि अपस्मारं कर्णपीडां शूलं रोद्रं भगन्दरं मासमात्रं पठेद्यस्तु स रोगैर्मुच्यते ध्रुवं भौमे।
शनिदिने वापि चक्रमध्ये पठेद्यदि सद्यस्तस्य महेशानि शारिकावरदा भवेत् वत्सरं येप-
ठेद्यस्तु त्रिवारं रात्रिव्यत्यये दत्वा बलिं सुरां मुद्रां मत्स्यमांसं च भक्तकं वकुलत्वग्रसाकीर्णं
शारी प्रादुर्भविष्यति यः पठेद्देवि लोलायां चितायां शवसन्निधौ पायं पायं त्रिवारं तु त।

शा. स.

स्पतुण्यफलं श्रुणु ब्रह्महत्यां गुरोर्हत्यां सुरापानं चगोवधं महापातकसंघातं गुरुतल्पग
नोद्भवं स्तेयं वा भ्रूणहत्या च नाशयेन्नात्र संशयः स एव हि रमापुत्रो यशस्वी लोकपूजितः
वरदानरतो मोदे विवीरेशो भक्तवल्लभः चक्रार्चने पठेद्यस्तु साधकः शक्तिसन्निधौ त्रिवारं
अष्टयामकः स भवेद्भैरवेश्वरः किं किं न लभते देवि साधको वीरसाधकः पुत्रवान्धनवांल्लो
के समाचारपरः शिवः शक्तिं संपूज्य देवेशि पठेत्स्तोत्रं परामयं इह लोके सुखं भुक्त्वा परत्र
त्रिदिवं व्रजेत् इति नामसहस्रं तु शारिकाया मनोहरं गोप्यं गुह्यतमं लोके गोपनीयं स्वयो
निवत् इति श्रीरुद्रयामले तन्त्रे दशविद्यारहस्ये शारिकामन्त्रनामसहस्रं संपूर्णम्

शा॰
स्तो॰
१

ॐ नमो देव्यै श्रीभैरव उवाच शृणु देवि प्रवक्ष्यामि स्तोत्रं मंत्रात्मकं परं पंचांगभूतं
सर्वस्वं मंत्रकोटिफलप्रदं अस्य श्रीशारिकास्तवराजस्य श्रीमहादेव ऋषिः त्रिष्टुप्छं
दः श्रीशारिकादेवता शांबीजं श्रीं शक्तिः फ्रां कीलकं धर्मार्थकाममोक्षार्थे स्त
वराजपाठे विनियोगः अथ ध्यानं बालार्ककोटिद्युतिमिंदुचूडां वरासिचक्राभयवा
हुमाद्यां सिंहाधिरूढां शिववामदेवलीनां भजे चेतसि शारिकेशीं १ अहं प्रपद्ये तव
मंत्रशिरोमौलिमाणिक्यं तं ध्याये च्चि तेशशिधरकलाविंदुविंबावतंसं यो मंत्रेशो
जयति मनसा माननीयो महद्भिः धर्मः पुण्यैः स भवति मरुद्दोऽप्रमानो महत्वात् १
परा बीजं तेजोनिधिमधिमनो यः प्रजपते जगन्मोहध्वांतामितपटलसूर्योदयमिदं
स लोकेशो भूत्वा विचरति महामांत्रिकमणिः धरायां वा नाके फणिपुरियथेष्टं त्रिभुवने २
मायाबीजमानंदजमिंदुविंबहंजपे द्यस्तव मंत्रमध्ये स देवि देवैः परिविष्टपार्थनि विष्टईश

न्मदिराक्षणाक्तः ४ कूर्चं वमकारलसत्प्रसादं जपेच्छिवेयः स्मरकेलिलोलः हुंका
रमात्रेणस वैरिवर्गहत्वा भवेद्भूपतिसार्वभौमः ५ गजाणीमाकाण्य जपेत्तणं यो मृ
गेक्षणापीनकुचांतरस्थः समेनकाकामरणप्रवीणोलीलावतीकेलिकलां करो
ति ६ स्मरं वीजं मंत्रमध्ये जपेद्यो मूढो जाडं वा विमध्योर्मिभग्नः तस्यास्याज्ञानिः
सरंते स्रवाचो गद्यैः पद्यैर्मेघसारप्रचाराः ७ कल्याणवीजं यदि साधकेंद्रो जपेच्छि
वेचेतसि वार्धरात्रे समोगवांलभ्यपरोनरेंद्रो भोगावतीप्राप्य भवेद्भवेशः ८ प्रोशा
विकायैतवमंत्रमध्ये यो नाम मंत्रं जपते महेशि तस्याजिह्मोरिपुवर्गलक्ष्मीर्वशीभ
वेत्साधककलोकमौलेः ९ अश्मरीवीजमीशानि यो जपेदर्धरात्रके सिंहासनाभग
वतीवरस्ह्यदर्शनप्रदा १० विंदुत्रिकोणवसुकोणसद्दलनागपत्रत्रिवृत्तनयरणीं।
गृहमंडलस्था वालार्कविंवसदृशानन विंवपद्मं यो ध्यायते वसमभवेद्भुविसार्वभौमः ११

पा.
स्तो.
२

योविंदुःसपितामहोहरिरसौसूर्यःस्वराःकीर्तितोयेरेफोद्धरितोद्यमर्दनकरोरुद्रः
सदागीयते यःप्राणःसपरःसएवभगवान्नादःशिवःसर्वदादेवीचंद्रकलाकलं
करहितामायेतितस्मैनमः १२ श्रीशारिकास्तवमिमंपठतेप्रभातेयोवार्धरात्र।
समयेर्चनकर्मकाले इंद्रःसुरासुरयतःस्वयमेत्यतस्य पूजांविधायदयतेत्रिदि
वाधिपत्यं १३ इतीदंदेविपंचांगंशारिकायारहस्यकं सर्वस्वंपरमंगुह्यंत्रैलोक्योद्ध
रणक्षमं १४ पुण्यंपवित्रमायुष्यंश्रेयस्करयशस्करं मकारैःपंचभिःपूज्यंसाध्यंसा
धकसत्तमैः १५ संरक्ष्यंपुत्रवद्देविदर्शयेदिष्टवित्तवत् इदंरहस्यमाख्यातंशारि
कासारस्तुतमं १६ अभक्तायनदातव्यंकुचैलायदुरात्मने निंदकायान्यशिष्या
यसमंत्रीनिरयीभवेत् १७ श्रीदेव्युवाच भगवन्भवतानेनपंचांगकथनेनहि
क्रीतास्मितवदास्यस्मि किमन्यत्कथयामिते १८ श्रीभैरवउवाच पंचांगंतत्वमी।

शानिशिलासर्वस्वस्तुत्तमं गुह्यं गोप्यतमं देवि गोपनीयं मुमुक्षुभिः १९ इति ।
श्रीरुद्रयामले तंत्रे दशविद्यारहस्ये श्रीशारिकाभगवतीस्तवराजः समाप्तः ॥

3